अथ तृतीयः पटलः

कुर्यात् प्रागधिवासकर्मदिवसान्मित्राङ्कसङ्ख्ये दिने
शैलेषुप्रमितेऽथ[1]वाधिगतयामायां शुभायां निशि।
प्रत्यग्द्वारि सुरालयोदगुपक्लृप्ते संवृते मण्डपे
मन्त्री तन्तुकुशस्रगादिकृतसंस्कारेऽङ्कुरारोपणम्॥१॥

विमर्शिनी

अतीतपटलेन प्रासादप्रतिमादिसम्पादनमभिधाय सम्प्रति प्रतिष्ठाकर्मणः प्राक्कर्त्तव्य-बीजावापादिकं ब्रूते - कुर्यादिति। अधिवासकर्मदिवसात् प्राक्। यद्यपि प्रतिष्ठाकर्मणः प्रागिति वक्तव्यम्,

"अष्टमेऽह्नि प्रतिष्ठायाः प्राक् कुर्यादङ्कुरार्पणम्"

इत्याद्यागमेषूक्तत्वात्। तथापि बीजाङ्कुराणामधिवासकर्मण्येव विनियोग इत्यभिप्रेत्य तथोक्तम्। अधिवासकर्मदिवसः प्रतिष्ठाया दिवसात् पूर्वेद्युरेव। तस्मात् प्राक्। मित्राङ्कसङ्ख्ये मित्रा द्वादश अङ्का नव तत्सङ्ख्ये वा। शैलेषुप्रमिते शैलाः सप्त इषवः पञ्च तत्सङ्ख्ये वा दिने अधिगतयामायां प्राप्तैकयामायां शुभायां निर्दोषायां

---

१. 'पि'

Shripuram Publications
www.shripuram.org

निशि सुरालयोदगुपक्लृप्ते देवालयस्योदग्भागकल्पिते प्रत्यग्द्वारि पश्चिमभागगत[1]द्वारे संवृते सम्यगाच्छादिते तन्तुकुशस्त्रगादिकृतसंस्कारे तन्तुकुशस्त्रगादिभिः कृतसंस्कारे। आदिशब्देन मुष्ट्या[2]दिभिः स्थलशुद्धिर्विवक्षिता। मण्डपे अङ्कुरारोपणं कुर्यात्। मन्त्रीति, स्थलशुद्ध्यादौ मन्त्रं कर्म च जानन्नित्यर्थः।।१।।

विवरणम्

अथाधिवासदिनपूर्वदिनेषु कर्तव्यं सर्वं वदन् प्रथममधिवासशेषतया मङ्गलाङ्कुरारोपणमाह - कुर्यात् प्रागिति। अधिवासकर्मदिवसात् प्राङ्मित्राङ्कसङ्ख्ये दिने निशि सुरालयोदगुपक्लृप्ते मण्डपेऽङ्कुरारोपणं कुर्यादित्यन्वयः। उत्तममध्यमाद्यभिप्रायेण मित्राङ्कादिदिवससङ्ख्याविकल्पः। कर्तुरनुरूपपरिग्रहाद्यर्थो वा। *अतिगतयामायां निशीति। तद्रात्रावपि प्रथमयामेऽतीते इत्यर्थः। शुभायामिति विष्ट्यादिराहित्यमुक्तम्। प्रत्यग्द्वारीत्यनेनैव देवालयोदग्भागेऽपि प्राग्भाग एवेति लभ्यते। तदुक्तम् 'मध्यसूत्रात् पुरो भवेदि'ति, 'ईशानसोमयोर्मध्य' इति च। संवृत इति। समन्तादाच्छादिते। मन्त्रीति स्नानतन्मन्त्रसकलीकरणादिकमुक्तम्। तन्तुकुशस्त्रगादिकृतसंस्कार इति। परिमण्डप एव संवृते स्थले सति मुष्ट्यादिभिः स्थलशुद्धिमात्रं स्यात्। पृथङ्मण्डपे तु यथोक्तरूपे सति भाविमण्डपसंस्काररीत्या त्रिगुणितसूत्रदर्भमालापरिकलनं द्वारदेश एवैकतोरणध्वजस्थापनं मुष्ट्यादिभिः स्थलशोधनं च कार्यम्।।१।।

क्षेत्रे वारिधिवर्गकोष्ठसुविचित्रे शालिदर्भाग्रकैः
पीठानि प्रविधाय तेषु विनिदध्यात् पालिकाः षोडश।
अस्त्राप्क्षालितवर्मसूत्र[3]कलिता दूर्वादिदीप्ता लस-
त्कूर्चा मृत्सिकताकरीषरजसा पूर्णा हुताशादितः।।२।।

विमर्शिनी

तद्विधानमाह - क्षेत्र इत्यादिभिः। वारिधिवर्गकोष्ठसुविचित्रे वारिधयश्चत्वारः तेषां वर्गाः षोडश तत्सङ्ख्यैः पदैर्विचित्रिते क्षेत्रे शालिदर्भाग्रकैः शालिभिः दर्भाग्रैश्च पीठानि प्रविधाय तेषु पीठेषु अस्त्राप्क्षालितवर्मसूत्रकलिता अस्त्रमन्त्रेण अप्भिः क्षालिताः कवचमन्त्रेण त्रिगुणसूत्रेण बद्धाः दूर्वादिदीप्ताः दूर्वादर्भपल्लवैः शोभिताः मृत्सिकताकरीष-

---

१. 'कृ' ख. पाठः, २. 'ख्या' क. पाठः, ३. 'रचिता' क. पाठः
* 'अथवातिगतयामायाम्' इति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

रजसा मृद्भिर्वालुकाभिः करीषरजोभिश्चोत्तरोत्तरं पूर्णाः लसत्कूर्चाः शोभनकूर्चैश्च युक्ताः षोडश पालिकाः हुताशादितः अग्निकोणमारभ्य निदध्यात्। अयं भावः – दक्षिणपङ्क्तौ पूर्वादिपश्चिमान्तं तदुत्तरपङ्क्तौ पश्चिमादिपूर्वान्तं तस्या अप्युत्तरपङ्क्तौ पूर्वादिपश्चिमान्तं सर्वोत्तरपङ्क्तौ पश्चिमादिपूर्वान्तमिति।।२।।

विवरणम्

क्षेत्रे वारिधिवर्गकोष्ठसुविचित्र इति। वर्गो नाम समद्विधातः वारिधीनां चतुर्णां वर्ग एकचतुरश्रतया षोडशकोष्ठानि यत्र तद्वारिधिवर्गकोष्ठं क्षेत्रं यद्वा वारिधिभिर्वर्गा यत्र कोष्ठेष्विति समासः। प्रागग्रैरुदगग्रैश्च षट्षट्सूत्रैः पञ्चवर्गात्मकं क्षेत्रं विधाय तत्र मध्यमपुटेन प्रागग्रामुदगग्रां च वीथीं विमृज्यादिति भावः। प्रतिकोष्ठं शुक्लरक्तरजो-विकिरणेन स्वस्तिकादिकरणेन वा सुविचित्रं भवति। पीठानीति प्रतिकोष्ठं पीठविरचन-मुक्तम्। हुताशादितो विनिदध्यादिति सम्बन्धः। सर्वदक्षिणपङ्क्तौ प्रागादिपश्चिमान्तं तदनन्तरपङ्क्तौ पश्चिमादिप्रागन्तम्, एवमुत्तरपङ्क्त्योरपीति भावः। वीथीपक्षे प्रतिखण्डं वाग्न्यादीशान्तत्वं स्यात्। दूर्वादिदीप्ता इति शिरीषाङ्कुराश्वत्थस्तबकादिग्रहणम्। तैरलङ्करणमेतदुक्तम्। प्रणव एवेह कूर्चन्यासे मृदादिपूरणे निधाने च मन्त्रः मन्त्र्यङ्कुरारोपणं कुर्यादित्येवैतदर्थमपि भवति। लसत्कूर्चा इति प्रत्येकं तद्वदनेषु ह्रस्वोत्कूर्चन्यास उक्तः। पूर्णा इति क्रमेणोत्तरोत्तरं पूरिता इति भावः। पालिकानां दर्भाद्यलङ्करणानन्तरं गन्धालेपनं सन्धूपनमपि प्रणवेन कार्यम्। यद्यप्येतत् सर्वं पीठपूजानन्तरमुचितं किंतु सौकर्यार्थमिदानीं क्रियते। यद्वा परिकर्मिणो व्यापारोऽयमभिप्रेतः। पीठपूजानन्तरं तु तथाकल्पनया भाव्यम्। यतो वक्ष्यति–

"पीठं प्रपूज्य परिकल्पितसांस्क्रियासु"

इति।।२।।

अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानि
बीजानि तत्र पुरतो विनिधाय मन्त्री।
इष्टाम्बिकेयकृतनान्द्यभिधानकर्मा
पुण्याहमाचरतु मूर्तिधरैरुपेतः।।३।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

एवं पालिकासादनमुक्त्वा बीजसादनादिकमाह - अस्त्रेति। मन्त्री मन्त्रविशेषज्ञो गुरुः अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानि अस्त्रेण स्वमन्त्रेण च क्रमात् जलेन दुग्धेन च क्षालितानि बीजानि तत्र पुरतो विनिधाय इष्टाम्बिकेयकृतनान्द्यभिधानकर्मा भूत्वा इष्ट आम्बिकेयो गणपतिर्येन कृतं नान्द्यभिधानं कर्म च येन सः, नान्द्यभिधानकं नान्दीमुखं, मूर्तिधरैरुपेतः मूर्तिपालैः सह मङ्गलाङ्कुरदेवताः प्रीयन्तां प्रीयन्तां मङ्गलाङ्कुरदेवताः इति विशेषयुक्तं पुण्याहमाचरतु। अत्र पुण्याहकाले बीजानां पालिकानां च प्रोक्षणमवगन्तव्यम्।।३।।

विवरणम्

अस्त्रस्वमन्त्रजलदुग्धसमाप्लुतानीति। पूर्वं सुदर्शनादिस्वास्त्रेण ततः स्वमन्त्रेण 'मूलं प्रक्षालनेऽणुरखिलेष्वि'त्यादिवक्ष्यमाणेन (जलेन) दुग्धेन च समाप्लुतानि। इह जलेन क्षालनपूर्वकं आप्लावनं समाप्लावनं क्षीरेण त्वाशु गुणवदङ्कुरोत्पत्त्युचिततयाप्लावनं समाप्लावनम्। बीजानि तत्र पुरतो विनिधायेति। स्वपुरतः स्थण्डिले दर्भान् विकीर्य नानापात्रेष्वेकपात्रे वा यथायोगं निधानमुक्तम्। मन्त्रीति। नान्दीमुखपुण्याहयोर्मन्त्रविशेषविदित्यर्थः। इष्टाम्बिकेयः कृतनान्द्यभिधानकर्मा चेति समासः। गणपतिमिष्ट्वा नान्दीमुखं च कृत्वेत्यर्थः। प्रायश्चित्तपूर्वकं नान्दीमुखमिष्यते। मन्त्रस्तु तत्र प्रसिद्ध एव। ओं बीजाङ्कुरदेवताः प्रीयन्तामित्येवं पुण्याहे मन्त्रः ब्रह्माद्याश्च वक्ष्यमाणास्ता देवताः।।३।।

पीठं प्रपूज्य परिकल्पितसंस्क्रियासु
विष्णुं स्वनाममनुनार्हतु पालिकासु।
बीजेषु तत्तदधिपांश्च पृथक्स्थितेषु
सम्मिश्रितेषु यजतामथवौषधीशम्।।४।।

विमर्शिनी

पीठं प्रपूज्य परिकल्पितसंस्क्रियासु कृतशोषणादिक्रियासु पालिकासु विष्णुं स्वनाममनुना 'ओं विष्णवे नम' इति मन्त्रेण अर्हतु अर्चयतु। पृथक्स्थितेषु बीजेषु तत्तदधिपांश्चार्हतु। अथवा सम्मिश्रितेषु युक्तेषु बीजेषु ओषधीशं सोमं 'सों सोमाय नम' इति मन्त्रेण यजताम्।।४।।

Shripuram Publications
www.shripuram.org

विवरणम्

परिकल्पितसंस्क्रियास्विति शोषणादि सर्वमुक्तम्। पालिकासु विष्णुं स्वनाममनुनार्हत्विति। मन्त्रीत्येतदिहापि योजनीयम्। स्वनाममनुर्वैष्णवः षडक्षरो निजनाममन्त्र एव वा। पालिकासु पृथग्वा समुदायतो वा पूजनम्। पृथक्स्थितेषु बीजेषु तत्तदधिपांश्चेति। तत्तदधिदेवताः स्वनाममन्त्रैरर्चयेदित्यर्थः। शोषणादि तु बीजेष्वपि समानम्। सम्मिश्रितेष्विति। यद्येकपात्र एव सम्मिश्रितानि स्युस्तदा तस्मिन् बीजौघे सोमं स्वनाममनुना पूजयेदित्यर्थः। यद्वा पूर्वं पृथग् ब्रह्मादीन् पूजयित्वा पुनर्मिश्रयित्वा सोमपूजाप्यनेनोक्ता। यदुक्तम् - 'द्रव्याण्येतानि पात्रेषु कृत्वे'त्यादि, 'एकस्मिन्नेव पात्रेऽथ सर्वाण्येतानि निक्षिपेदि'त्यादि चेति।।४।।

ब्रह्मार्च्योऽधियवं मुरारिरधिमुद्गं सर्षपेष्वीश्वरो
निष्पावेषु मरुत् प्रियङ्गुषु गुहो माषेष्वमर्त्याधिपः।
खल्वेष्वग्निरिनोऽधिशाल्यधितिलं प्रेताधिभू राजमा-
षाख्येष्वप्पतिराढकीषु च रमा श्यामेषु सोमः क्रमात्।।५।।

विमर्शिनी

पृथक्स्थितेषु बीजेष्वर्चनार्यं तद्देवतामाह - ब्रह्मार्च्य इति। अधियवं यवेषु ब्रह्मार्च्यः, अधिमुद्गे मुद्गेषु मुरारि विष्णुः, सर्षपेष्वीश्वरो रुद्रः, निष्पावेषु मरुद् वायुः, प्रियङ्गुषु गुहः स्कन्दः, माषेषु अमर्त्याधिपः इन्द्रः, खल्वेष्वग्निः, अधिशालि शालिषु इनः सूर्यः, अधितिलं तिलेषु प्रेताधिभूः यमः, राजमाषेष्वप्पतिर्वरुणः, आढकीषु रमा श्रीः, श्यामेषु सोमश्च। तेषां क्रमाच्चतुर्थीनमोन्तानि स्वस्वनामान्येव मन्त्राः। बीजानां पृथगर्चनेऽपि सम्मिश्रितेषु बीजेषु सोमार्चनं कर्तव्यम्।।५।।

विवरणम्

बीजानां पृथगधिदेवतास्तदा च तेषां क्रममपि दर्शयति - ब्रह्मार्च्योऽधियवमिति। सप्तम्यर्थेऽव्ययीभाव इति बोद्धव्यम्। मुरारिर्विष्णुः। ईश्वरो रुद्रः। मरुद्वायुः। अमर्त्याधिप इन्द्रः। इनस्सूर्यः। प्रेताधिभूर्यमः। अप्पतिर्वरुणः। रमा श्रीः। क्रमादिति। मूलतन्त्रेषु नानाक्रमदर्शनादयं क्रम इहाश्रित इति ज्ञेयम्।।५।।

Shripuram Publications
www.shripuram.org

एतानि बीजानि समाहितात्मा क्रमेण पात्रेषु पवित्रपाणिः।
नदत्सु वाद्येषु वपेत् तदुक्तमन्त्रेण वह्न्यादिशिवावसानम्।।६।।

विमर्शिनी

अर्चितानां बीजानां वापमाह - एतानीति। गुरुः पवित्रपाणिः समाहितात्मा च भूत्वा वाद्येषु नदत्सु सत्सु एतानि बीजानि पात्रेषु स्थापितासु पालिकासु तदुक्तमन्त्रेण[१] तत्र वापस्योक्तमन्त्रेण वह्न्यादिशिवावसानं पूर्वप्रोक्तेन क्रमेण वपेत्।।६।।

विवरणम्

एतानि बीजानीति। पृथक्स्थितानि वा सम्मिश्रितानि वेति भावः। समाहितात्मेति। ... ... क्रमेण पात्रेषु वपेदित्यन्वयः। पृथक्स्थितपक्षे तेषामेकैकपालिकास्वपि वह्न्यादिशिवान्ततयावस्थानं यथा स्यात् तथा वपनं कार्यमिति ज्ञेयम्। यथा यवांस्तावत् तत्तत्पालिकास्वग्न्युद्देशे वपन्नग्न्यादिशिवान्तं क्रमेण पालिकासूप्त्वा ततो मुद्गांस्तत्तत्पालिकासूप्तयवानन्तरपश्चिमोद्देशे वपन्नग्न्यादिशिवान्तं पालिकासु वपोदित्यादि। सम्मिश्रितपक्षे तु बीजौघस्यैवाग्न्यादीशान्तं पालिकासु वाप इति। पवित्रपाणिरिति। प्रादेशमात्रदर्भयुगलरूपमेतत् पवित्रम्। कराञ्जलिना च वपनं कार्यम्।।६।।

तानि प्रोक्षतु तत्तदागमसमुक्तेनाणुना सादरं
पाथोभिः कुशकूर्चचर्चितकरो गन्धक्षपामेदुरैः।
देवं तत्र ततोऽभिवाह्य सकलीकृत्योपहारान् क्रमाद्
दत्त्वा स्नानविधौ समुक्षतु तथापोह्यादितन्मन्त्रतः।।७।।

विमर्शिनी

वापानन्तरं प्रोक्षणादिकमाह - तानीति। कुशकूर्चचर्चितकरः दर्भमयेन कूर्चेनालङ्कृतकरो गुरुः तानि बीजानि गन्धक्षपामेदुरैः अष्टगन्धरजनीचूर्णमिलितैः पाथोभिः जलैः तत्तदागमसमुक्तेन तेषु तेष्वागमेषु प्रोक्षणार्थमुक्तेन (अणुना) मन्त्रेण सादरं प्रोक्षतु। ततस्तत्र देवमभिवाह्य सकलीकृत्योपहारान् क्रमाद् दत्त्वा स्नानविधौ स्नानकाले आपोह्यादितन्मन्त्रतः आपोहिष्ठादिप्रोक्षणमन्त्रैः तथा पूर्वोक्तप्रकारेण प्रोक्षतु च।।७।।

---

१. 'ण वा' क. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

तत्तदागमसमुक्तेनेति। शिवे गायत्र्या मूलेन वेत्यादि सूचितम्। सादरमित्युप्तबीजानामक्षोभः प्ररोहानुगुणतेत्यादि यथा स्यात् तथा प्रोक्षणार्थमुक्तम्। कुशकूर्चचर्चितकरो दर्भकूर्चान्वितकरः। गन्धक्षपामेदुरैः पाथोभिरिति। चन्दनरजनीरजोयोगतः सिद्धैर्जलैः। पात्रान्तरे जलमेवं कृत्वास्त्रप्रोक्षणशोषणादि कृत्वा प्रणवेन सम्पूज्य प्रोक्षणं कार्यम्। वपनं प्रोक्षणं च सकृत् त्रिर्वा स्यात्। सादरमित्यनेन प्रोक्षणे प्रतिपत्तिर्वा सूचिता। यदुक्तं - 'राजताद्रिशिखराभमखण्डं शीतभासमुपरि प्रविचिन्त्ये'त्यादि। स्नानविधौ समुक्षत्विति। शक्यत्वादेतद्विधानम्।।७।।

दत्त्वा वस्त्रादिभूषावधि तदनु यजेत् तं च पञ्चोपहारै-
र्नैवेद्यान्ते प्रसाद्या[1]मलवसनवृतान्यस्त्रतस्तानि रक्षेत्।
प्रागाद्यासूपलिप्तास्तृतकुशरुचिरास्वष्टदिक्ष्वर्चयित्वा
दद्यात् तद्रा[2]त्रिपेभ्यो बलिमपि परिषत्संहितेभ्यो ग्रहेभ्यः।।८।।

विमर्शिनी

तदनु वस्त्रादिभूषावधि वस्त्रादिभूषणान्तमुपहरणं दत्त्वा तदनु तं देवं पञ्चोपहारैर्यजेच्च। नैवेद्यान्ते प्रसाद्य प्रसन्नपूजां कृत्वा अमलवसनवृतानि नवीनवस्त्राच्छादितानि (तानि) बीजान्यस्त्रतो रक्षेत्। उपलिप्तास्तृतकुशरुचिरासु उपलिप्तासु क्षिप्तदर्भासु च प्रागाद्यासु अष्टदिक्षु तद्रात्रिपमन्त्रेणार्चयित्वा तद्रात्रिपेभ्यः परिषत्संयुतेभ्यो ग्रहेभ्यः 'ओं ब्रह्मग्रहेभ्यो नमः' 'तत्पारिषदेभ्यो नमः' इत्यादिमन्त्राभ्यां बलिमपि दद्यात्।।८।।

विवरणम्

कवचेनास्त्रेण मूलेनैव वा नवीनवस्त्रेण वाच्छादनं स्यात्। तान्यस्त्रतो रक्षेदिति तालत्रयादिकमुक्तम्। यद्वास्त्रेण नीराजनमप्युक्तम् इति। प्रागाद्यास्वष्टदिक्ष्विति। प्रत्यग्द्वारेऽपि मण्डपे तद्बहिः पूर्वाद्यष्टदिक्षु। परिमण्डपादिमात्रे तु पालिकानामेव प्रागाद्यष्टदिक्ष्विति बोद्धव्यम्। उपलिप्तास्तृतकुशरुचिरास्विति गोमयोदकेनोपलेपनं तत्र दर्भास्तरणं चोक्तम्। परिषत्संयुतेभ्यो ग्रहेभ्य इति। एतदुक्तं भवति - पूर्वं ब्रह्मग्रहेभ्यो नम इति सम्पूज्य बलिं दत्त्वा तदनु तत्पारिषदेभ्यो नम इति सम्पूज्य बलिं दद्यात्। एवं

---

१. 'सन्नार्चनमुदितमभिध्याय रक्षां च कुर्यात्।', २. 'स्वद्रव्ययुक्तं बलिमपि परितो रात्रिपेभ्यो प्र' क. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

भूतेन्द्रादीनामपीति। बलिप्रक्रिया तूत्सवपटले भविष्यति। एवं तावत् प्रथमे दिने निशि कर्तव्यमुक्तम्।।८।।

उक्षेदूर्ध्वदिनेषु पीठयजनान्ते पात्रबीजाधिदै-
वेज्याकृत् सवनेषु देवमभिवाह्योक्तक्रमात् पूजयेत्।
रात्रौ तत्र बलिं हरे[१]दिह बलिः शुद्धेन भूतान्धसा
तत्तद्द्रव्यसमन्वितेन चरुणा वान्ते स्वयं स्नातु च।।९।।

विमर्शिनी

एवं तद्रात्रिकर्मोक्त्वा शेषदिनेषु कर्तव्यं कर्माह - उक्षेदिति। ऊर्ध्वदिनेषु त्रिषु सवनेषु पीठपूजान्ते पात्रबीजाधिदैवेज्याकृत् पात्रबीजयोरधिदैवतं विष्णुः सोमश्च तयोः पूजाकृन्मन्त्री तत्तन्मन्त्रेणोक्षेत्। ततः उक्तक्रमाद् देवमभिवाह्य पूजयेत्। तत्र तेषु दिनेषु रात्रौ तृतीयसवनपूजानन्तरं बलिं हरेच्च। इह अत्रत्यो बलिः शुद्धेन चरुणा वा भूतान्धसा भूतकूरहविषा वा तत्तद्द्रव्यसमन्वितेन तत्तद्देवतानां विहितेन द्रव्यसमन्वितेन चरुणा वा स्यात्। अन्ते बलिदानानन्तरं स्वयं गुरुः स्नातु च, बलिदानानन्तरं स्नानस्य विहितत्वात्।।९।।

विवरणम्

उक्षेदूर्ध्वदिनोष्विति। द्वितीयादिदिनेषु। सवनेष्विति। प्रातर्मध्याह्ने सायं चेत्यर्थः। पीठयजनान्त उक्षेदित्यन्वयः। पीठं सम्पूज्य यथोक्तं सेचनं कृत्वा पात्रबीजदेवतेज्या स्यात्। पीठयजनान्ते पात्रबीजाधिदैवेज्याकृदुक्षेदिति वा योजना। पृथग्वापे तत्तदधिदेवताः पूज्याः। सम्मिश्रितवापे सोमः समुच्चये तूभयपूजा स्यादिति। इह बलिः शुद्धेनेति। केवलेन हविषा वेत्यर्थः। दौग्धेनेति वा पाठः। भूतान्धसेति। वक्ष्यमाणेन भूतकूरहविषा वेत्यर्थः। अन्ते स्वयं स्नातु चेति। मण्डपबहिर्बलिदानोपपत्तावेतदित्यवबोद्धव्यम्। पुनः स्नात्वैव भोजनं देवपूजादि वा कार्यमित्यभिप्राय इति।।९।।

शालीमाषयवप्रियङ्गुतिलमृत्साखल्वमुद्गासु[२]री-
शिम्बश्यामकराजमाषकमयः शाङ्गींशदुर्गाजिते।
बीजौघः शिवविघ्नयोरपयवान्त्योऽन्तं[३]द्विहीनो गुहे
निर्मुद्गादिरथार्यके ससुमनो वेणूत्थनीवारवान्।।१०।।

---

१. 'त्सपरिषद्भ्यस्तद्ग्रहेभ्यस्ततः स्नायादप्यधिवासकर्मदिवसे प्रातर्बलिं चाचरेत्।। शा' ख. पाठः, २. 'डकीराजिश्या' ख. पाठः, ३. 'न्त्य' मूलकोशपाठः

www.shripuram.org

विमर्शिनी

बीजवापकर्माभिधाय बीजादीनाह - शालीति। शाङ्र्गीशदुर्गाजिते शङ्करनारायण-दुर्गाविष्णुषु शालीमाषयवप्रियङ्गुतिलमृत्साखल्वमुद्गासुरीशिम्बश्यामकराजमाषकमयः शाल्यादिराजमाषान्तस्वरूपो बीजौघः बीजानां समूहः स्यात्। (ശാലി = നെല്ല്, മാഷം = ഉഴുന്ന്, യവം അതുതന്നെ, പ്രിയംഗു = തിന, തിലം = എള്ള്, മൃത്സാ = തുവര, ഖല്വം = മുതിര, മുദ്ഗം = ചെറുപയർ, ആസൂരി = കടുക്, ശിംബം = അവര, ശ്യാമകം = ചാമ, രാജമാഷം = വലിയ പയറ്) शिवविघ्नयोरपयवान्त्यः अपगतो यवोऽन्त्यो राजमाषश्च यस्मिन् बीजौघे। गुहे अन्तद्विहीनः अन्ते प्राप्ताभ्यां श्याम(क)राजमाषाभ्यां हीनः। अथार्यके निर्मुद्गादिः निर्गतो हीनो मुद्गादिः यथा स तथा ससुमनः सुमनेन सहितः। इह सुमनशब्दोऽकारान्त एव, "गोधूमः सुमनः समौ" इत्युक्तत्वात्। वेणूत्थनीवारवांश्च वैणवेन नीवारेण च सहितः। (സുമനം=കോതമ്പ്, വേണൂത്ഥം=മുളനെല്ല്, നീവാരം=വരിനെല്ല്)।।

विवरणम्

शालीमाषेति। बीजौघो वपनीयबीजनिचयः। शिवविघ्नयोरपयवान्त्यः यवेनान्त्येन राजमाषेण च विरहितः। दशैवैवमनयोर्बीजानीत्यर्थः। अथार्यके निर्मुद्गादिरित्यन्वयः। मुद्गादिपञ्चरहितो गोधूमादियुतश्च बीजौघः। एवमपि दशबीजानीति भावः।।१०।।

बीजानि वह्निभुवि वा शिववत् स्वमूलं
प्रक्षालनेऽणुरखिलेषु हराविनार्णम्।
तत्रेश्वरे भवति तत्पुरुषः प्रवापे
स्यात् त्र्यम्बकाणुरधिशूलि परेषु मूलम्।।११।।

विमर्शिनी

वह्निभुवि स्कन्दे शिववद्वा बीजानि। अखिलेषु देवेषु बीजस्य प्रक्षालने स्वमूलं स्वस्वमूलमेव अणुर्मन्त्रः। हरौ इनार्णं द्वादशाक्षरमन्त्रः। ईश्वरे तत्र प्रक्षालने तत्पुरुषोऽणुः। अधिशूलि शिवे प्रवापे त्र्यम्बकाणुः त्रम्बकायेत्यादिमन्त्रः। परेषु प्रवापे मूलमन्त्रः।।११।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

बीजानि वह्निभुवि वा शिववदिति। वह्निभूः स्कन्दः। हराविनार्णमिति। द्वादशाक्षरं प्रक्षालने मन्त्रः। तत्रेति। प्रक्षालने। परेषु मूलमिति। प्रवाप इत्यनुषङ्गः।।११।।

त्रि[1]यम्बकाय शर्वाय शङ्कराय शिवाय च।
सर्वलोकप्रधानाय शाश्वताय नमो नमः।।१२।।

इति।।

विमर्शिनी

त्र्यम्बकाणु पठति - त्रियम्बकायेति।।१२।।

गायत्र्या निजयात्र सेचनविधिर्विघ्नार्यषाण्मातुरे
शाङ्‌र्गीशाजितयोस्त्रितारकनमोमूर्ध्ना जितन्ताणुना।
कार्यः षण्मुखविद्ययेषुभुवि वा शक्त्या ध्रुवाद्यन्तया
दुर्गायां मनुना मनोभवरिपौ वापोदितेन स्वयम्।।१३।।

विमर्शिनी

विघ्नार्यषाण्मातुरे गणपतिशास्तृस्कन्देषु अत्र निजया स्वस्वगायत्र्या सेचनविधिः कार्यः। शाङ्‌र्गीशाजितयोः त्रितारकनमोमूर्ध्ना प्रणवत्रयं नमश्शब्दश्चोर्ध्वस्थितेन जितन्ताणुना 'जितन्त' इत्यादिमन्त्रेण, इषुभुवि स्कन्दे षण्मुखविद्यया 'ओं नमः षण्मुखाये'ति मन्त्रेण वा, दुर्गायां घ्रुवाद्यन्तया प्रणवपुटितया शक्त्या भुवनेश्वर्या, मनोभवरिपौ शिवे वापोदितेन स्वयं 'त्रियम्बकाये'त्यनेनैवः।।१३।।

विवरणम्

त्रितारकनमोमूर्ध्नेति सर्वेष्वपि सेचनमन्त्रेषूचितमेतत्। षण्मुखविद्या तदुपचारमन्त्रः। मनुनेति सर्वत्र योज्यम्। वापोदितेन स्वयमिति। तेनैवेत्यर्थः।।१३।।

बलेर्ब्रह्मभूतेन्द्रगन्धर्वयक्षाः
सरक्षः पिशाचाः स्मृता विष्णुविघ्नाः।

---

१. 'त्र्यम्ब' क. पाठः

Shripuram Publications
www.shripuram.org

ततः स्कन्दरुद्राः शिवाः शर्वविघ्ने
द्विषड्[1] देवता रात्रिक्लृप्त्यात्र योज्याः।।१४।।

विमर्शिनी

बलिदेवता आह - बलेरिति। शर्वविघ्ने शिवगणेशयोः बलेः बलिविधेः ब्रह्मभूतेन्द्र-गन्धर्वयक्षाः इति पञ्च, सरक्षः पिशाचाः राक्षसपिशाचयुक्ता इति द्वे, विष्णुविघ्ना इति च द्वे, ततः स्कन्दरुद्रा इति च द्वे, शिवाश्च इत्येका। अत्र सर्वबहुवचनं मन्त्रे च बहुवचनप्रयोगार्थम्। इति द्विषड् द्वादश देवताः स्मृताः। अत्रासु देवतासु मध्ये रात्रीणां क्लृप्त्या योज्याः। अयं भावः - पञ्चरात्रिक्लृप्त्यैव बीजावापः क्रियते चेत् पञ्चसु रात्रिष्वादौ भवाः पञ्चैव देवताः स्युः, सप्तरात्रिक्लृप्त्या चेत् सप्तैव, नवरात्रिक्लृप्त्या चेन्नव, द्वादशरात्रिक्लृप्त्या चेदखिला योज्या इति।।१४।।

विवरणम्

रात्रिक्लृप्त्यात्र योज्या इति। दिवसविकल्पास्तावदुक्ता 'मित्राङ्कसङ्ख्ये दिन' इत्यादि। तत्र द्वादशरात्रमुत्तमं, तद्विषये चैता द्वादशदेवता गणिताः। तत्र पञ्चरात्रिसम्भवे ब्रह्मभूतेन्द्रगन्धर्वयक्षा इतीयत्यो देवता योज्या इत्यादि बोद्धव्यम्।।१४।।

भूतपितृयक्षनागब्रह्मशिवा बलिभुजः स्मृता विष्ण्वन्ताः।
हरिहरदुर्गाहरिषु स्कन्द इमे शिवसमुक्तबीजोप्ति[2]विधौ।।१५।।

विमर्शिनी

हरिहरदुर्गाहरिषु भूतपितृयक्षनागब्रह्मशिवाः इति षट्, विष्ण्वन्ताः अन्ते विष्णुयुक्ताः इत्येकः, एवं सप्त बलिभुजः स्मृताः। स्कन्दे शिवसमुक्तबीजोप्तिविधौ शिवसमुक्तानि बीजान्युप्यन्ते चेद् इमे बलिभोक्तारः।।१५।।

विवरणम्

शिवसमुक्तबीजोप्तिविधाविति। उप्तिर्वापः। वह्निभुवि वा शिववदित्यत्रे-त्यर्थः।।१५।।

---

१. गुहे देवताश्चेन्द्रभूतक्रमात् ते।। भू ख. पाठः, २. 'क्ति' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

भूतेशे बलिभाजो भूतपिशाचाश्च यक्षनागाश्च।
ब्रह्मशिवविष्णुपितरः ससर्वदेवा ग्रहा नव प्रोक्ताः।।१६।।

विमर्शिनी

भूतेशे शास्तरि भूतपिशाचाः इति द्वौ, यक्षनागाश्च इति च द्वौ, ब्रह्मशिवविष्णुपितरः इति चत्वारः, ससर्वदेवाः सर्वदेवसहिता इत्येकः, एवं नव बलिभाजो ग्रहाः प्रोक्ताः।।१६।।

इतीरितानां बलिदेवतानां सङ्ख्यातिरिक्तेषु बलिं दिनेषु।
तदन्त्यया देवतयैव दद्याद् वक्ष्ये बलिद्रव्यगणं क्रमेण।।१७।।

विमर्शिनी

इतीरितानां बलिदेवतानां सङ्ख्यातिरिक्तेषु देवताभ्योऽहस्सङ्ख्याधिक्ये तद्दिनेषु तदन्त्यया देवतयैव बलिं दद्यात्। बलिद्रव्यगणं क्रमेण वक्ष्ये।।१७।।

विवरणम्

सङ्ख्यातिरिक्तेष्विति। सप्तदेवताविषये मित्राङ्कसङ्ख्ये दिन इति रात्रिसङ्ख्यातिरेकः देवतावशाद् द्वि[1]त्रराात्रिसङ्ख्यातिरेकः सर्वत्रापि सम्भवति। पञ्चरात्रिसम्भवे रात्रिक्लृप्त्यात्र योज्या इति हरिहरादिष्वपि तुल्यमिति।।१७।।

ब्राह्मं पुष्पकुशाक्षताम्बुचरुणान्यं भूतकूरान्धसा
सर्पिः सक्तुपयोदधीन्द्रलतिका[2]गौलान्धसैन्द्रं हरेत्।
तुर्यं वैणवपायसेन जलपुष्पाज्यान्धसा पञ्चमं
दोषाकम्बुतुषैः सरक्तकुसुमान्धोगन्धकै राक्षसम्।।१८।।

माषान्नान्वितमत्स्यमांसकृरक्षौद्रैः सतैलक्षपा-
लाजैः सप्तममष्ट[3]मं गुलभुवा वैघ्नं त्रिमध्वोदनैः।
दध्याज्यान्वितकेरदुग्धचरुणा स्कान्दं शि[4]वेऽन्यन्निशा-
दध्युद्यत्कृसरेण स[5]द्विपमुखेऽन्त्यं साज्यदुग्धान्धसा[6]।।१९।।

(युग्मकं)

---

१. 'द्वित्रादिस' ख. पाठः, २. 'सिद्धान्ध' ख. पाठः, ३. 'न्धसा गु' ख. पाठः, ४. 'बलिं यामिनीद', ५. 'शैवमथ चान्त्यं', ६. 'सा।। इति द्वादश ब्रह्मपूर्वग्रहाणां बलिद्रव्यकाणि क्रमेणोदितानि। द्वितीयं तृतीयं च तद्देवतावद् विपर्यस्य कार्यं गुहे द्रव्यकं च।। हा' ख. पाठः।

Shripuram Publications www.shripuram.org

विमर्शिनी

सद्विपमुखे सगणपतौ शिवे पुष्पकुशाक्षताम्बुचरुणा पुष्पकुशाक्षतजलयुक्तेन हविषा ब्राह्मं ब्रह्मदेवत्यं बलिं हरेत्। अन्यं भौतिकं भूतकूरान्धसा भूतकूरयुक्तेन हविषा। भूतकू(रो?रं) वक्ष्यति। ऐन्द्रं सर्पिः सक्तुपयोदधीन्द्रलतिकागौलान्धसा। (സക്തു=തരി പ്പണം, ഇന്ദ്രലതികാ=ഉഴിഞ്ഞ) गौलान्धो गुलेन सह पक्वं हविः। तुर्यं गान्धर्वं वैणवपायसेन। पञ्चमं याक्षं जलपुष्पाज्यान्धसा जलपुष्पाज्यसहितेन हविषा। राक्षसं दोषाकम्बुतुषैः। (ദോഷാ=മഞ്ഞൾ, കംബു=കമ്പ, തുഷം=ഉമി) सरक्तकुसुमान्धोगन्धकैः। रक्तकुसुमं (അന്ധസ്സ്=ഹവിസ്സ്) सप्तमं पैशाचं सतैलक्षपालाजैः माषान्नान्वितमत्स्यमांसकृसरक्षौद्रैः। माषान्नं माषेण सह पक्वमन्नं, मत्स्यमांसं मोदकादिप्रतिनिधिना कल्पितं, कृसरं तिलेन सह पक्वमन्नं, क्षौद्रं मधु। अष्टमं वैष्णवं गुलभुवा गुलान्नेन। वैघ्नं त्रिमध्वोदनैः त्रिमधुरहविर्भिः। स्कान्दं दध्याज्यान्वितकेरदुग्धचरुणा। केरदुग्धं नालिकेरक्षीरम्। अन्यद् रौद्रं निशादध्युद्यत्कृसरेण निशादधिभ्यां सहितेन कृसरेण (നിശാ = മഞ്ഞൾ) कृसरमुक्तम्। अन्त्यं शैवं साज्यदुग्धान्धसा आज्यक्षीरसहितहविषा।।१८, १९।।

विवरणम्

अन्यं भूतकूरान्धसेति। भूतबलिमित्यर्थः। भूतकूरौदनं वक्ष्यति-'हारिद्रं दधिलाजसक्तुपललाढ्यमि'ति। दोषा हरिद्रा।।१८।।

विवरणम्

अष्टमं गुलभुवेति। गौलान्धसा। त्रिमध्वोदनैरिति। त्रिमधुरान्धसा। शिवे सद्विपमुख इति। शर्वविघ्न इत्येतदनुवादः। अन्यन्निशादध्युद्यत्कृसरेणेति रुद्रबलिः। कृसरस्तिलौदनम्। अन्त्यं साज्यदुग्धान्धसेति शिवबलिः।।१९।।

गुहेऽत्र निःश्यामकराजमाषे बीजे विपर्यस्तमुपाद्ययुग्मम्।
स्कन्दग्रहेभ्यो बलिरष्टमेऽह्नि गौलेन दौग्धेन ततः परस्तात्।।२०।।

विमर्शिनी

गुहे अत्र बलिविधौ निःश्यामकराजमाषे श्यामराजमाषाभ्यां[१] रहिते, बीजे उपाद्ययुग्मं

१. 'माकरा' ख. पाठः

Shripuram Publications
www.shripuram.org

द्वितीयतृतीये देवते विपर्यस्तमिन्द्रभूतक्रमेण। तथा तद्बलिद्रव्ययुग्ममपीत्यर्थः। तत्राष्टमेऽह्नि स्कन्दग्रहेभ्यो गौलेन बलिर्भवति। ततः परस्तात् स्कन्दग्रहेभ्य एव दौग्धेन च।।२०।।

विवरणम्

विपर्यस्तमुपाद्ययुग्ममिति। ब्रह्मेन्द्रभूतेत्यमुना क्रमेणेत्यर्थः। दौग्धेन ततः परस्तादिति। यदुक्तम्- 'अष्टमं नवमं तथा। गुलान्नं पायसं स्कान्दमि'ति।।२०।।

हारिद्रं दधिसक्तुलाजपललाढ्यं भूतकूराह्वयं
प्राचीनं तिलतण्डुलं परमुडुम्बं लाजधानान्वितम्।
याक्षं नागमुशन्ति केररसशालीपिष्टसक्तूत्तरं
पाथोजाक्षतमन्नपूपमपरं गौलोदनं सप्तमम्।।२१।।

दिवसेऽष्टमे पयोन्नं कृसरं नवमे पयोन्नमत ऊर्ध्वम्।
द्रव्याणि विष्णुदुर्गाहरीशषाण्मातुरेष्वाहुः।।२२।।

विमर्शिनी

विष्णुदुर्गाहरीशषाण्मातुरेषु प्राचीनं प्राग्भवं दधिसक्तुलाजपललाढ्यम्। (ലാജം = മലർ, പലലം = എള്ളുവറുത്തത്) हारिद्रं निशाचूर्णेन सह पक्वमन्नं भूतकूरमिति सर्वत्र प्रसिद्धम्। उशन्ति इच्छन्ति। परं द्वितीयं तिलतण्डुलं तिलेन तण्डुलेन च सहितं हविरित्यर्थः। अत्र सर्वत्र तत्तदुक्तद्रव्येण सह हविर्योज्यम्। याक्षं तृतीयं लाजधानान्वितम् उडुम्बम्। (ധാനാ = അരിവറുത്തത്, ഉഡുംബം = ഉൗമൻ) नागं चतुर्थं केररसशालीपिष्टसक्तु नालिकेरक्षीरं शालीपिष्टं सक्तु च। उत्तरं पञ्चमं पाथोजाक्षतम्। पाथोजं पद्मम्। अपरं षष्ठम् अन्नपूपम् अन्नमपूपं च। सप्तमं गौलौदनम् अष्टमे दिवसे पयोन्नम्। नवमे कृसरम्। अत ऊर्ध्वं सर्वेष्वहस्सु पयोन्नमेवेति द्रव्याण्याहुः। बुधा इति शेषः।।२१, २२।।

विवरणम्

हारिद्रमिति। विष्णुदुर्गाहरीशषाण्मातुरेष्वाहुरित्युपर्यन्वयः। प्राचीनमिति भूतबलिम्। परमिति पितृबलिम्। उत्तरं पाथोजाक्षतमित्यन्वयः। पाथोजं पद्मम्। अन्नपूपमपरमिति। पूपोऽप्यपूप एव।।२१, २२।।

Shripuram Publications
www.shripuram.org

भूतान्नैस्तैलमांसौदनरजनिरजः सक्तुभिर्लाजधाना-
दध्यौडुम्बैस्तथा तण्डुलविमलरजः सक्तुकेरीपयोन्नैः।
स्यात् पद्मव्रीहिदूर्वाक्षतयवतिलसिद्धार्थगन्धैर्गुलान्नै-
र्दौग्धान्नैर्दाधिकान्नैर्बलिरिह कुसुमान्नैः क्रमाद् भूतनाथे।।२३।।

विमर्शिनी

भूतनाथे क्रमात् पूर्वं भूतान्नैः भूतकूरैः। पुनः तैलमांसौदनरजनिरजःसक्तुभिः। तैलमभ्यङ्गम्। मांसं मोदकेन कल्पितम्। अन्यानि स्पष्टानि। पुनः लाजधानादध्यौडुम्बैः। एतान्युक्तानि। तथा पुनः तण्डुलविमलरजः सक्तुकेरीपयोन्नैः तण्डुलचूर्णं सक्तु नालिकेरक्षीरमन्नं च, एतैः। पुनः पद्मव्रीहिदूर्वाक्षतयवतिलसिद्धार्थगन्धैः, एते प्रसिद्धाः। पुनः गुलान्नैः पुनः दौग्धान्नैः। पुनर्दाधिकान्नैः दध्ना सह पक्वहविर्भिः कुसुमान्नैः। इह बलिविधौ एतैर्बलिः स्यात्।।२३।।

विवरणम्

भूतान्नैरिति भूतकूराभिप्रायम्। यत्रौदनो नोक्तो यथा तिलतण्डुलं परं लाजधानादध्यौडुम्बैरिति, तत्राप्योदनयोग इष्यते। मांसस्थाने[1] मोदको भवति।।२३।।

पौर्वाह्णिके प्रत्तबलीन् सुरूपान्[2]
स्वारूढपीठादिचितीनथैतान्।
बीजाङ्कुरान् मन्त्रिवरोऽधिवास-
कर्मण्यमुष्मिन् विनियोजयेच्च।।२४।।

विमर्शिनी

अथाधिवासकर्मणि तद्विनियोगविधानमाह - पौर्वाह्णिक इति। अथ मन्त्रिवरः मन्त्रदेवतयोरैक्यं विद्वान्। अधिवासकर्मदिने पौर्वाह्णिके प्रातःकालपूजानन्तरं प्रत्तबलीन् प्रकर्षेण दत्तबलीन्। सुरूपान् शोभनवर्णान्। स्वारूढपीठादिचितीन् स्वस्मिन् योजितपीठादिगतचैतन्ययुक्तान् बीजाङ्कुरान्। अमुष्मिन्नधिवासकर्मणि विनियोजयेच्च। प्रतिमायाः परितः संस्थाप्य तद्विभूतित्वेन कल्पयेदित्यर्थः।।२४।।

---

१. 'ससमाने नो' ख. ग. पाठः, २. 'नारू' क. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विवरणम्

अधिवासदिने विशेषं वदन् विनियोगमप्याह - पौर्वाह्णिक इति। प्रातस्सवन एवं[1] प्रत्तबलीन् दत्तबलीन्। सुरूपानिति। यदुक्तम् - 'शुभं पीतेषु शुक्लेषु समेषूर्ध्वेष्वृजुष्वपी'ति। स्वारूढपीठादिचितीनिति पीठोद्वासनं, तोरणध्वजादिसम्भवे तदुद्वासनमप्युक्तम्। अमुष्मिन्निति। भाविनि अधिवासकर्मणि मन्त्रिवरो विनियोजयेदिति।।२४।।

संस्थाप्य केतुं बलिपीठबाह्ये
घण्टापताकानिजवाहनाढ्यम्।
त्रिसन्ध्यमभ्यर्च्य किरेद् बलिं च
तत्प्रक्रियां वच्मि महोत्सवोक्तौ।।२५।।

विमर्शिनी

ध्वजस्थापनस्यापि कर्तव्यतामाह - संस्थाप्येति। (बलिपीठबाह्ये) बलिपीठस्थानस्य बाह्ये घण्टापताकानिजवाहनाढ्यम् घण्टया पताकया निजनिजवाहनेन च युक्तं केतुं संस्थाप्य। त्रिसन्ध्यं सन्ध्यात्रयेऽप्यभ्यर्च्य बलिं किरेच्च। महोत्सवोक्तौ महानुत्सवो महोत्सवस्तदभिधाने। (तत्प्रक्रियां) तत्प्रकारं वच्मि वक्ष्यामीत्यर्थः।।२५।।

विवरणम्

तत्प्रक्रियां वच्मीति वदन् प्रतिष्ठायामनियतोऽयं ध्वज इत्यपि सूचितवानिति।।२५।।

अधिवासविधानवासरात् प्रा-
गथ तुर्येऽहनि साधकः सुक्लृप्ताम्।
प्रतिमां परिगृह्य कारुवर्या-
दपराह्णेऽप्स्वधिवासयेत[2] शैलीम्[3]।।२६।।

विमर्शिनी

अथ प्रतिमापरिग्रहादिकं विधत्ते - अधिवासेति। अथ साधकः अधिवासविधानवासरात्। प्रतिष्ठाकर्मणः पूर्वदिवसोऽधिवासकर्मवासर इति पूर्वमेवोक्तम्। तस्मात् प्राक्

---

१. 'वं' ख. पाठः, २. 'स्व' क. पाठः, ३. 'लीम्।। स्विष्टात्माज्यमधू' ख. पाठः

Shripuram Publications
www.shripuram.org

तुर्ये चतुर्थेऽहनि। अपराह्णे मध्यकालातीते। शैलीं शिलासम्बन्धिनीम्। सुक्लृप्तां लक्षण-कौशलेन च शुभावयवसंस्थानकल्पितां प्रतिमाम्। कारुवर्यात् शिल्पिप्रवरात् परिगृह्य अप्सु अधिवासयेत।।२६।।

विवरणम्

अथ प्रतिमापरिग्रहं प्रस्तौति - अधिवासविधानवासरादिति। शैलीं शिलामयीं प्रतिमाम्।।२६।।

स्नात्वा समाचम्य समञ्चितात्मा
मन्त्री समभ्यर्च्य गणाधिनाथम्।
सन्तर्प्य विप्राञ्छिवदिक्प्रक्लृप्ते
तन्मण्डपे नेत्रविधिं विदध्यात्।।२७।।

विमर्शिनी

तत्क्रियाक्रममाह - स्नात्वेत्यादिभिः। मन्त्री स्नात्वा तदर्थं मन्त्रस्नानं कृत्वा। समाचम्य तथा मन्त्राचमनमपि विधाय। समञ्चितात्मा क्वचिच्छुद्धे प्रदेशे उपविश्य सकलीकरणशङ्खपूरणात्माराधनकृद् भूत्वा गणाधिनाथं समभ्यर्च्य अग्रतः स्वस्तिके[1] शालिदर्भादिभिः क्लृप्ते पीठे यथाविधि शोधितं सुवर्णमयं चषकं संस्थाप्य कूर्चविन्यासानन्तरं घृतं मधु च सममासिच्य मूलेनार्चयित्वा विप्रान् दानैः सन्तर्प्य शिवदिक्प्रक्लृप्ते तन्मण्डपे गत्वा नेत्रविधिं नेत्रोल्लेखनविधिं विदध्यात्।।२७।।

विवरणम्

समञ्चितात्मेति देहशुद्ध्यादि सर्वमुक्तम्। मन्त्रीति। तत्प्रतिमोचितमन्त्राभिज्ञः। शिवदिक्प्रक्लृप्ते तन्मण्डप इति। प्रासादस्यैशभागे प्रागुदीरितशिल्पिनिलयाग्रदेशे रचिते बिम्बपरिग्रहमण्डपे इत्यर्थः। अत्र कार्याल्पत्वान्मार्जन[2]लेपनाभ्यामेव शुद्धिः स्यात्। वितानप्रदीपाद्युचितमेव।।२७।।

संयोज्याज्यमधू सुवर्णचषके स[3]ञ्जप्य मध्वृक्त्रिकं
[4]शुद्धस्वालयसम्मुखीनशयनीयन्यस्तबिम्बाक्षिणी।

१. 'ते' क. पाठः, २. 'ना' ख. पाठः, ३. संयोज्य म, ४. 'जप्त्वा स्वा'

Shripuram Publications
www.shripuram.org

सूच्यग्रेण विलिख्य साज्यमधुना तक्ष्णा[१] समुत्कीर्य ते
प्रोक्ष्यापूर्य तथैव साज्यमधुना शय्यादि तक्ष्णेऽर्पयेत्।।२८।।

विमर्शिनी

कथं तदित्यत्राह - संयोज्येति। सुवर्णचषके संयोजितं तदादाय मध्वृक्त्रिकं 'मधु वाता' इति तृचं सञ्जप्य। शुद्धस्वालयसम्मुखीनशयनीयन्यस्तबिम्बाक्षिणी शुद्धे प्रासादाभिमुखशय्यायां शयनीये न्यस्तस्य बिम्बस्याक्षिणी नेत्रे। साज्यमधुना आज्यमधुयुक्तेन सूच्यग्रेण विलिख्य। तक्ष्णा ते अक्षिणी समुत्कीर्य स्पष्टीकरणं कारयित्वा। जलेन प्रोक्ष्य तथैव तेन साज्यमधुना आपूर्य पुनः शय्यादि सुवर्णचषकादिकं च तक्ष्णेऽर्पयेत् दापयेत्।।२८।।

विवरणम्

संयोज्याज्यमधू सुवर्ण(झ?च)षक इति। (झ?च)षकं वृत्तिकास्थण्डिले दर्भसंस्तरे[२] (झ?च)षकं न्यग्बिलं निधाय अस्त्रेण प्रोक्ष्य शोषणादि कृत्वोत्तानिते प्रणवेनाज्यमधुनी निषिच्य संयोज्य तस्यापि शोषणादि कृत्वा प्रणवेन पूजयेत्। सञ्जप्य मध्वृक्त्रिकमिति। 'मधु वाता' इत्यादि मन्त्रत्रयम्। शुद्धस्वालयेति। *शुद्धे स्वालयसम्मुखीने शयने संवेशिताया अर्चाया दृशौ। साज्यमधुना सूच्यग्रेण विलिख्येति योजनीयम्। शयनं शय्या स्वस्तिकादौ व्रीहिवस्त्रादिकल्पिता। तस्याः पूर्वदिक्छिरस्कतया समास्तरणे स्वालयसम्मुखीनत्वं स्यात्। शय्यायाः शुद्धिश्च नवाम्बरकृतत्वमस्त्रप्रोक्षणादि च। शयने संवेशनं शिल्पिप्रवरेण तदुचिततया शायनम्। हरिहरेऽक्षित्रयविलेखनं भवति। बिम्बमस्त्रेण प्रोक्ष्य तेन सूच्यग्रप्रदेशेन तदाज्यमधू समादाय तेन दक्षिणवामनेत्रयोः, त्र्यक्षसम्भवे पुनर्ललाटनेत्रे चोल्लेखनं कार्यम्। तक्ष्णा समुत्कीर्य ते इति। ततः शिल्प्याचार्येण ते नेत्रे समुत्कीर्णे स्वशस्त्रेण समुन्मेषिते कारयित्वेत्यर्थः प्रोक्ष्येति पुनर्नेत्रयोः प्रोक्षणमुक्तम्। साज्यमधुना तथैवापूर्येति सूच्यग्रपूर्वकमापूरणमुक्तम्। शय्यादि तक्ष्णेऽर्पयेदिति। शयन(झ?च)षकादि तदुपयुक्तं सर्वं यजमानेन तस्मै शिल्पिने प्रदापयेदित्यर्थः।।२८।।

शय्यायां शयितस्य शर्वगुहयोर्बिम्बस्य दद्याद्[३] बलिं
राज्याज्योज्ज्वलपायसेन परितः प्राग् देवताभ्योणुना।

---

१. 'सूच्या तया शिल्पिना तद्दृष्टी सुसमे विधाप्य शयनाद्यस्मै पुनर्दापयेत्।। शय्या',
२. 'संस्थ झ' क. पाठ, ३. 'त्त्वा व' ख. पाठः
* 'शुद्धस्वालयसम्मुखीनशयने संवेशितार्चादृशौ' इति विवरणपाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

मूर्धन्यक्षतसर्षपाच्छकुसुमं न्यस्येत् त्रिनेत्रे ततः
सूत्रं चन्दनचर्चितं च मणिरेखायामनेन क्षिपेत्।।२९।।

विमर्शिनी

शिवस्कन्दयोर्विशेषमाह - शय्यायामिति। प्राक् नेत्रोल्लेखनात् प्राक्। शय्यायां शयितस्य शर्वगुहयोर्बिम्बस्य परितो राज्याज्योज्ज्वलपायसेन सर्षपाज्ययुक्तेन पायसेन। देवताभ्योणुना 'देवताभ्यः पितृभ्योऽथे'त्यादिमन्त्रेण बलिं दद्यात्। तत्र त्रिनेत्रे मूर्धनि शिरसि। अक्षतसर्षपाच्छकुसुमम् अक्षतसर्षपयुक्तं श्वेतपुष्पं न्यस्येत्। ततश्चन्दनचर्चितं चन्दनपङ्करूषितं (सूत्रम्) अनेन 'ओं नमो भगवत' इत्यादिमन्त्रेण मणिरेखायां क्षिपेत्।।२९।।

विवरणम्

शिवादौ विशेषमाह - शय्यायामिति। शयितस्य प्रागुक्तवत् संवेशितबिम्बस्य मूर्धनीति सम्बन्धः। प्राग् तद्बिम्बं परितः प्रागाद्यष्टदिक्षु राजिभिराज्येन च व्यामिश्रितेन पायसेन देवताभ्यः पितृभ्योऽथेति पुरोक्तमन्त्रेण बलिं दद्यात् वाद्यघोषणमिह सामान्यसिद्धम्। शिवे भेदमाह - त्रिनेत्रे तत इति। लक्षणं मणिरेखा पार्श्वरेखे चेत्येतत् सर्वं गतपटले लक्षितम्। क्षिपेदित्यास्फालनाभिप्रायम्। हस्तद्वयेनाङ्गुष्ठोपकनिष्ठिकाभ्यां गन्धाप्लुतं सूत्रमग्रयोर्गृहीत्वा मणिरेखास्थाने समास्फालनरूपेण विन्यसेदिति। अनेनेति वक्ष्यमाणमन्त्र-ग्रहणम्।।२९।।

"ओं नमो भगवते रुद्राय हिरण्यरेतसे महात्मने शिवाय शिवरूपाय उमाप्रियाय नमो नमः" इति।

विमर्शिनी

ततस्तन्मत्रे लिखति - 'ओं नम' इत्यादि।

सम्प्रोक्तक्रमतो विलोचनविधिं कुर्याद् गुहेऽथेश्वरे-
ऽघोरेणाज्यमधू सुयोज्य मधुमन्मन्त्रं प्रजप्यामुना।।
सूच्यग्रेण विलिख्य लक्ष्म मणिरेखापार्श्वरेखान्वितं
तक्ष्णा[१] तद् विरचय्य सर्वमथ मध्वाज्येन सम्पूरयेत्।।३०।।

---

१. 'मन्त्री तत्परिपूर्य तेन रचयेत् तक्ष्णा यथालक्षणम्।। सन्तु' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ गुहे सम्प्रोक्तक्रमतो विलोचनविधिं नेत्रोल्लेखनं कुर्यात्। ईश्वरे अघोरेणाज्यमधू सुयोज्य। मधुमन्मन्त्रं 'मधु वाते'ति तृचं प्रजप्य। 'अमुना (मधुवाते'ति तृचेन) साज्यमधुना सूच्यग्रेण मणिरेखापार्श्वरेखान्वितं लक्ष्मविलिख्य। तक्ष्णा तत् लक्षणादिकं विरचय्य। अथ सर्वं लक्ष्मादिकं रेखासमूहं मध्वाज्येन सम्पूरयेत्।।३०।।

विवरणम्

स्कन्देऽपि भेदमाह - सम्प्रोक्तक्रमतो विलोचनविधिं कुर्याद् गुह इति। संवेशितार्चादृशौ सूच्यग्रेणेति नेत्रविलेखनं तत्समुत्किरणं पुनस्तत्पूरणं चोक्तम्। शिवे पुनर्भेदमाह - अथेश्वर इति। सुयोज्येति। प्राग्वदस्त्रप्रोक्षणादिपूर्वकं सुवर्ण(झ?च)षक इति प्रकरणादसेयम्। लक्ष्मेति लिङ्गगतं लक्षणम्। मणिरेखया पार्श्वरेखाभ्यां चान्वितमिति समासः। तत्सर्वमिति। लक्षणादित्रयम्। सम्पूरयेदिति। तत्सर्वमित्यनुशङ्गः। शय्यादि तक्ष्णेऽर्पयेदिति सर्वत्र समानम्।।३०।।

सन्तुष्टेन ततो निजायतनवद् भद्रासने स्थापितं
तक्ष्णा तत्करतः प्रगृह्य यजमानेनाथ तत् प्रार्पितम्।
तारेण प्रविलोक्य तच्चरणयोस्तारं प्लुतं प्रोच्चरन्
गृह्णीयान्मनुबिम्बमुद्गतकुशाग्राभ्यां कराभ्यां गुरुः[1]।।३१।।

विमर्शिनी

तत्परिग्रहप्रकारमाह - सन्तुष्टेनेति। अथ गुरुः सन्तुष्टेन हिरण्यवस्त्रादिदानतस्तृप्तेन तक्ष्णा। तत उद्धृत्य निजायतनवद् निजप्रासादो यद्दिङ्मुखस्तद्दिङ्मुखं भद्रासने स्थापितम्। यजमानेन तत्करतः कारुकरतः प्रगृह्य प्रार्पितम्। तद् मनुबिम्बं तारेण प्रविलोक्य तारं प्लुतं प्रोच्चरन्। उद्गतकुशाग्राभ्याम् ऊर्द्ध्वगतदर्भाग्राभ्यां कराभ्याम्। तच्चरणयोरभिवाद्यरूपेण गृह्णीयात्।।३१।।

विवरणम्

सन्तुष्टेन तक्ष्णेति। दक्षिणादिभिरिति शेषः। यदा बिम्बं क्रीतं स्यात् सदाप्येतत् सर्वं कार्यम्। निजायतनवदिति। प्राग्द्वारे प्रासादे प्राङ्मुखं, प्रत्यग्द्वारे प्रत्यङ्मुखमिति

---

१. 'बुधः।।' क.

Shripuram Publications
www.shripuram.org

भावः। ततो भद्रासन इति। ततः शय्यांतलादुद्धृत्य[1] भद्रासने तेनैव तक्ष्णा स्थापितम्। अथ तत्करतः प्रगृह्य जयमानेन प्रार्पितं तदिति। यथोक्तं स्थपतिरग्रतस्तिष्ठन् पृष्ठतः स्थितस्य कर्तुर्हस्ते दद्यात्। कर्ता प्रतिमां स्पृशन् तिष्ठेत्। अथ आचार्यस्तत्समीपमागत्याचम्य सकलीकृतात्मेत्यादि। तारेण प्रविलोक्येति। पुरतस्तिष्ठन्निति भावः। मनुबिम्बं तच्चरणयोः कराभ्यां गृह्णीयादित्यन्वयः। तारेण प्रविलोक्यैतदुचितम्[2]। शिवेऽप्येतत् सर्वमनुसरणीयम्। *बुध इति। दक्षिणपादे दक्षिणकरेण सव्यपादे सव्यकरेण च दीर्घदर्भाग्रेण युगपत् सङ्ग्रहणमुक्तम्। यद्वा पीठब्रह्मशिलाकर्मबिम्बानां बलिपीठवाहनादीनां च सहाधिवासोपपत्तौ तेषामपि बिम्बोपयुक्तशेषेण यथास्वं नेत्रोल्लेखनादि पुनश्शोधनादि च सर्वमुक्तम्। वक्ष्यति च - 'पीठं ब्रह्मशिलायुतं कृतजलावासान्तमुक्तक्रमाद्' इति। तथा - "कुर्यात् तुर्यदिनात्यये यदि महापीठप्रतिष्ठापनम्" इत्यादि।।३१।।

पाथोदर्भकधेनुबालघृतमासूराम्बुभिः श्रीपतौ
साज्यक्षौद्रकवल्कमृद्भसितचूर्णैर्गन्धतोयैः शिवे।
अप्क्षौद्राज्यकदर्भवल्कसुमृदद्भिश्चाजितेशे मधू-
र्ध्वस्थाज्येन हरीरितेन महिषारावम्बुदर्भादिना।।३२।।

दर्भाद्यप्पशुलूमगोधृतमसूराब्गोमयादिभिर्गुहे
पाथोमृन्निजकल्कदर्भजलमध्वाज्यैः समासूरकैः।
विघ्ने शास्तरि साम्बुदर्भकुशमृत्त्वग्गव्यकैः शालिपि-
ष्टादिभिश्च क्रमतः स्वमूलमनुना स्वास्त्रेण वा शोधयेत्।।

विमर्शिनी

गृहीतस्य बिम्बस्य शोधनमाह - पाथ इति। श्रीपतौ पाथोदर्भकधेनुबालघृतमासूराम्बुभिः क्रमतः स्वमूलमनुना स्वास्त्रेण वा शोधयेत्। अयमत्र शोधनप्रकारः - उक्तमन्त्रेण पूर्वं (पाथो?) जलेनाभिषिच्य[3] दर्भकैः संघृष्य धेनुबालेन च संघृष्य घृतेनाभिषिच्य (മാസൂരം = കടലക്കാപ്പൊടി) तेनोद्वर्त्याम्बुभिः क्षालयेदिति। एवं सर्वत्रानुरूपेण शोधनं कार्यम्। स्वमूलमनुना स्वास्त्रेण वेति प्रत्येकं सम्बध्यते। शिवे साज्यक्षौद्रकवल्कमृद्भसितचूर्णैः आज्यसहितेन क्षौद्रेण। क्षौद्रं मधु, वल्कास्त्वचः, मृन्मृत्तिका, भसितं भस्म चूर्णं च।

---

१. 'सनादु' क. पाठः, २. प्रोक्ष्यैतदुचितम्।' ख. पाठः, ३. 'ले तेना' ग. पाठः
* 'गुरुः' इत्यस्य स्थाने 'बुध' इति विवरणरीत्या पाठः

Shripuram Publications
www.shripuram.org

एतैर्गन्धतोयैश्च। अजितेशे अप्क्षौद्राज्यकदर्भवल्कसुमृदद्भिश्च। महिषारौ हरीरितेन हरावुक्तेन अम्बुदर्भादिना। मधूर्ध्वस्थाज्येन आज्यात् पूर्वं मधुना च। गुहे दर्भाद्यप्पशुलूमगोघृतमसूराब्गोमयाद्भिः। दर्भादिः दर्भा मृदस्त्वचश्च, अपः जलं, पशुलूम पशुवालं, गोघृतमाज्यमेव, मसूर उक्तः, अप् गोमयम् अम्बु च, एतैः। विघ्ने पाथोमृन्निजकल्कदर्भजलमध्वाज्यैः समासूरकैः। निजकल्काः निजास्त्वचः। शास्तरि साम्बुदर्भकुशमृत्त्वग्गव्यकैः शालिपिष्टादिभिश्च।।३२, ३३।।

विवरणम्

स्थूलां बिम्बशुद्धिमाह - पाथोदर्भकेति। शोधयेदित्युपरि सम्बन्धः। इह पूर्वमस्त्रप्रोक्षणतालत्रयाद्यौचित्यसिद्धम्। जलदर्भादि सर्वं दर्भसंस्तरे संसाद्य अस्त्रप्रोक्षशोषणादि कृत्वा प्रणवेन पूजयेत्। गोबालेऽप्यस्त्रप्रोक्षणं स्यात्। मासूरं मसूरपिष्टमुद्वर्तनीयम्। साज्येति मध्वाज्ययोगविकल्पोऽपि सूचितः। वल्ककल्कशब्दौ त्वग्वचनौ। हरीरितेन मधूर्ध्वस्थाज्येन अम्बुदर्भादिनेति। जलदर्भगोवालमध्वाज्यमासूरपिष्टजलैरित्यर्थः। दर्भादिपदेन दर्भमृत्त्वग्ग्रहणम्। लूमशब्दो वालपर्यायः। विघ्न इत्यधः सम्बन्धनीयम्।।३२,३३।।

मुद्गनिशायवशालीगोधूमसुवर्णजानि चूर्णानि।
स्थाणौ स्वबिम्बकलशाद्यवगन्तव्यं मृदादि सर्वेषु।।३४।।

विमर्शिनी

चूर्णान्याह - मुद्गेति। स्थाणौ मुद्गनिशायवशालीगोधूमसुवर्णजानि चूर्णानि। (ഗോധൂമം=ഗോതമ്പ്) सर्वेषु मृदादि मृत्त्वगादि स्वबिम्बकलशाद्यवगन्तव्यं स्वबिम्बशुद्धिकलशादितो ज्ञातव्यम्।।३४।।

विवरणम्

स्वबिम्बकलशाद्यवगन्तव्यमिति। आदिशब्देनाभिषेकग्रहणम्। शिवेऽभिषेके माधूकब्रह्मशैरीषकपनसरसालाः, अजितगिरिशयोः प्लक्षहीनाः क्षीर्याख्या इति त्वचः। बिम्बकलशे स्थाणौ नाकूक्षतीर्थद्विपशिखरिनदीवेदिकाचत्वरोत्था इति मृदः। क्वथितकथितवृक्षत्वक्करीषं सुदग्धं भसितमिति सामान्यसिद्धं भस्मेति हरिहरे। क्षीरिद्रुमाद्विजशमीखदिरं कुमार्यां, हरीशे खदिरोनितं तदिति त्वचः। सरिदुभयतटक्षेत्रनाकूक्षजाता मृत्स्नाः शाङ्गीश इति

Shripuram Publications
www.shripuram.org

मृदः। स्कन्दे वेदीक्षेत्रगजोक्षशृङ्गगिरिवल्मीकोद्भवाः सरिदब्धिजे शरभव इति मृदः। न्यग्रोधद्रुरुदुम्बरश्चलदलप्लक्षौ रसालद्विजौ शैरीषस्समधूकदारुरपि सेनान्यमिति त्वचः। गणपतौ शैवोक्ता एव मृदः। किंतु क्षेत्राखुजा[1]श्च्युतचरमसरिज्जा इति विशेषः। विघ्ने पयोद्रुमकपित्थमधूकबिल्वमिति त्वचः। शास्तरि करिकिरिवृषवल्मीकनद्युद्भवाश्चेति मृदः। प्रभेशे क्षीर्याख्या इति त्वचः। इति।।३४।।

[2]अथालङ्कृत्य गन्धाद्यैः कुर्यान्नीराजनं शिवे।
विष्ण्वादौ निजहोमान्ते विघ्नादौ कौतुकान्ततः।।३५।।

विमर्शिनी

अत शिवे गन्धाद्यैरलङ्कृत्य नीराजनं कुर्यात्। विष्ण्वादौ विष्णुदुर्गास्कन्देषु। निजहोमान्ते निजाक्षतहोमावसाने। विघ्नादौ विघ्नशर्वश्रीशयोः। कौतुकान्ततः कौतुकबन्धनानन्तरम्। अत्र शिवशब्दः शास्तुरप्युपलक्षणार्थः।।३५।।

विवरणम्

अथालङ्कृत्य गन्धाद्यैरिति। निजनिजोक्तशोधनानन्तरमित्यर्थः। गन्धाद्यैरिति गन्धपुष्पाक्षतस्रगादिग्रहणम्। विष्ण्वादाविति दुर्गास्कन्दग्रहणम्। विघ्नादाविति हरिहरशास्तृग्रहणम्।।३५।।

अग्रेऽग्निं विनिधाय तत्र विधिवत् विष्णौ सदुर्गागुहे
प्रत्येकं शतशः शमीदलमिलद्भिः साज्यकैरक्षतैः।
सप्तव्याहृतिभिर्जुहोतु जिनवर्णनात्र पूर्णा हरौ
[3]सम्पातं प्रतिमाङ्गपूर्तिविधये पादादिषु प्रार्पयेत्।।३६।।

विमर्शिनी

अक्षतहोममाह - अग्र इति। सदुर्गागुहे विष्णौ अग्रे प्रतिमाया अग्रभागे। विधिवद् उल्लेखनादिपूर्वकम् अग्निं विनिधाय। तत्राग्नौ। शमीदलमिलद्भिः शमीपत्रमिश्रैः। साज्यकैरक्षतैः सप्तव्याहृतिभिः 'ओं भूः स्वाहा' इत्यादिभिः 'ओं सत्यं स्वाहा' इत्यन्तैर्मन्त्रैः

---

१. 'जाड्याश्च्यु' क. पाठः, २. 'एवं विशोधितं बिम्बं गन्धपुष्पाद्यलङ्कृतम्। .....थाय तत्र दर्भादि त्यक्त्वा भूमिं विशोधयेत्।। अ' ख. पाठः, ३. 'होमान्ते प्रतिमात्मनि प्रतनुयात् सम्पातपातादिकम्।। इ', ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

प्रत्येकं शतं जुहोतु। हरौ अत्र अक्षतहोमे। जिनवर्णेन गायत्र्या। पूर्णा पूर्णाहुतिः स्यात्। तेषु देवेषु संपातं प्रतिमाङ्गपूर्तिविधये प्रतिमाया अङ्गपरिपूरणार्थम्। पादादिषु मूर्धान्तेषु अर्पयेत्।।३६।।

विवरणम्

तत्राग्रेऽग्निमित्यन्वयः। विधिवदित्युल्लेखनादिकमग्नौ पूजादिकं प्रणवव्याहृतिपीठ-मन्त्राज्यहोमादिकं चोक्तम्। सप्तव्याहृतिभिः प्रत्येकं शतश इत्यन्वयः। शतं सर्वत्राष्टोत्तरं प्रथितम्। शमीदलमिलद्भिरिति। शमीपत्रमिश्रितैः। आज्यसंस्कृतावक्षतानामपि पर्यग्निकरणं भवति। अत्र हरौ जिनवर्णेन पूर्णेति। विष्णौ स्वगायत्र्या पूजा मन्त्रान्ते शतशतान्ते च पूर्णाहुतिः। दुर्गायां गुहे च निजमूलेनान्यदेवेष्वपीति भाविरीत्या तत्तन्मूलेनैवेत्यर्थः। प्रतिमाङ्गपूर्तिविधय इति। सुपूर्णलक्षणमपि बिम्बं परमसूक्ष्मोनातिरेकसम्भवादपूर्णमिव स्यात्। तदीयादृष्टक्षपणेन पूर्णतासम्पादनार्थमेतदिति भावः। शैवादिषु त्वेतदधिवासे कार्यम्। यद् वक्ष्यति हि - 'प्रागष्टोर्ध्वसहस्रम्' इत्यादि। पादादिष्विति। पादजानुगुह्यनाभिहृन्मुखमूर्धस्विति। प्रार्पयेदिति। पुष्पाञ्जलिः सामान्यतो लभ्यते।।३६।।

इष्ट्वा गन्धादिभिः कौतुकमथ[१] कलयेन्मूलतो विघ्नशर्व[२]-
श्रीशे [३]ताराभिरुद्धोपचरणमनुनोक्ताहुतेः प्राक् कुमारे।
चण्ड्यां चक्रेण वोर्ध्वं मुर[४]जिति जलवासोद्धृतौ सोपचारे-
णाष्टार्णेनार्यके प्राङ् निजकलशविधेर्बीजमन्त्रेण मन्त्री।।

विमर्शिनी

कौतुकबन्धनमाह - इष्ट्वेति। मन्त्री मन्त्रविशेषज्ञो गुरुः। विघ्नशर्वश्रीशे च अथ शोधनानन्तरं गन्धादिभिरिष्ट्वा मूलतः कौतुकं कलयेत्। कुमारे उक्ताहुतेः अक्षतहोमात् प्राक्। ताराभिरुद्धोपचरणमनुना प्रणवपुटितोपचारमन्त्रेण। चण्ड्यां दुर्गायाम्। उक्ताहुतेरूर्ध्वं वा पूर्वं वा चक्रेण सुदर्शनमन्त्रेण। मुरजिति जलवासोद्धृतौ जलाधिवासादुद्धृते सति। सोपचारेणाष्टार्णेन। आर्यके निजकलशविधेः बिम्बशुद्धिकलशाभिषेकात् प्राग् द्वादशपटले वक्ष्यमाणेन बीजमन्त्रेण च।।३७।।

---

१. 'पि' ख. पाठः, २. 'र्वे' क. पाठः, ३. 'बीजाणुनार्ये ध्रुवपरिपुटितेनोपचाराणुनाथ। स्कन्दे प्रोक्ताहुतेः प्राङ् महिषजिति पर वा रथाङ्गेन तोयावासोद्धारे जितन्तोपारिकृतनिजमूलेन शाङ्गर्युधे च।। स्थि ख. पाठः, ४. 'भिदि ज' मूलकोशपाठः

Shripuram Publications
www.shripuram.org

विवरणम्

मूलतो विघ्नशर्वश्रीश इति। कौतुकमिदानीमेव बन्धीयात्। वोर्ध्वमिति। उक्ताहुतेरूर्ध्वं वा प्रागेव वेत्यर्थः। मुरभिदि जलवासोद्धृताविति। वक्ष्यति च - 'प्रतिसरं तत् साम्प्रतिक्य' इति। सोपचारेणेति। जितन्तान्वितेन। मन्त्रीति कौतुकोक्तमन्त्रस्य प्रणवरुद्धत्वं नमोन्तत्वं चोक्तम्। अयमिह क्रमः सम्पद्यते। शिवे शोधितेऽलङ्करणं नीराजनं च, कौतुकं नास्ति। विष्णौ अलङ्करणाक्षतहोमौ नीराजनं च। हरिहरे गणपतौ चालङ्करणम्। गन्धादिभिरिष्ट्वा कौतुकं नीराजनं च। स्कन्दे तु तथा कौतुकानन्तरमक्षतहोमो नीराजनं च। दुर्गायां स्कन्दवत्। अथवालङ्करणाक्षतहोमौ गन्धादिभिरिष्ट्वा कौतुकं नीराजनं च। शास्तरि शिववदिति।।३७।।

स्थित्वा प्रार्थ्य नमस्त इत्यणुयुजा दर्भाग्रगर्भाञ्जलिः
क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्जस्वलं कौतुकम्।
ऊर्णासूत्रसितं सुवर्त्य परिजप्य स्वाणुना सप्तधा
[1]साङ्गुष्ठोपकनिष्ठिकाङ्गुलियुजा बध्नातु बाहूत्तमे।।३८।।

विमर्शिनी

कौतुकबन्धनस्योतिकर्तव्यतां दर्शयति - स्थित्वेति। दर्भाग्रगर्भाञ्जलिः दर्भाग्रद्वयेनान्तर्गतमञ्जलिं बद्ध्वा। अग्रतः स्थित्वा नमस्त इत्यणुयुजा 'नमस्तेऽर्चे! सुरेशानी'त्यादिमन्त्रद्वयेन प्रार्थ्य। क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्जस्वलं क्षौमखण्डे क्षिप्तेन मुक्तासर्षपसहितेन सुवर्णेन तेजोवत्। ऊर्णासूत्रसितम्। तेन बद्धं कौतुकम्। साङ्गुष्ठोपकनिष्ठिकाङ्गुलियुजा अङ्गुष्ठसहिताभ्यामनामिकाभ्यां सप्तधा सुवर्त्त्य। स्वाणुना परिजप्य बाहूत्तमे दक्षिणकरे बध्नातु।।३८।।

विवरणम्

स्थित्वेति। तिष्ठन् भूत्वेत्यर्थः। दर्भाग्रगर्भाञ्जलिर्नमस्त इत्यणुयुजा प्रार्थ्येत्यन्वयः। क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्जस्वलमूर्णासूत्रसितमिति। एवं कौतुकविरचनक्रमः उक्तः। क्षौमपट्टे मुक्तासर्षपसुवर्णं निक्षिप्तमूर्णासूत्रेण बद्धं कौतुकमित्यर्थः। ऊर्जस्वलपदेनास्य महावीर्यत्वं मङ्गल्यत्वं सर्वरक्षाकरत्वं चोक्तम्। कौतुकस्यास्त्रप्रोक्षणं शोषणादिकं तदुक्तमन्त्रेण

---

१. 'स्वा' क. पाठः

Shripuram Publications
www.shripuram.org

पूजनमभिमन्त्रणं चार्थसिद्धम्। स्वाणुना परिजप्य बाहूत्तमे बध्नात्विति बन्धनप्रकार उक्तः। सप्तधा सुवर्त्योति जपसमये व्यापारः। अर्थाच्च मन्त्रस्य सप्तवारमावृत्तिरपि लभ्यते। बाहूत्तम इति। दक्षिणबाहौ। तदापि बहुबाहुसम्भवे प्रधानबाहौ नोपबाहौ। मन्त्रान्ते च बन्धनं भवति।।३८।।

नमस्तेऽर्चे! सुरेशानि! प्रतीके! विश्वकर्मणः।
प्रभाविताशेषजगद्धात्रि! तुभ्यं नमो नमः।।३९।।
त्वयि सम्पूजयामीशं नारायणमनामयम्।
रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव।।४०।।

विमर्शिनी

विष्णुप्रार्थनामन्त्रद्वयं पठति - नमस्त इति।।३९, ४०।।

त्वयि सम्पूजयामीशौ शम्भुनारायणौ सदा।
इत्दायितत्तत्कल्पोक्तभिदयात्र मनुं पठेत्।।४१।।

विमर्शिनी

शिवनारायणादौ विशेषमाह - त्वयिति। अत्र कौतुकबन्धने। तत्तत्कल्योक्तभिदया तत्तदागमोक्तभेदेन सह मनुं पठेद् उच्चरेत्।।४१।।

विवरणम्

तत्तत्कल्पोक्तेति। यथा कार्त्तिकेयमनामयमित्यादि।।४१।।

नमस्तेऽर्चे! सुरेशानि! विश्वावासे! सुरारिणि!
प्रभाविताशेषजगद्धात्रि! तुभ्यं नमो नमः।।४२।।

त्वयि सम्पूजयामीशे! देवीं नारायणीं सदा।
रहितेत्यादिरूपोऽत्र दुर्गोपस्थानमन्त्रकः[१]।।४३।।

१. ‘कः।। नेत्रं तत्र तदीयनेत्रमनुमूलोङ्कारकैर्गोळतारार्चिष्कल्पनयोक्तकौतुकविधेः प्रागार्यके प्रोल्लिखेत्। ज्योतिलिंङ्गमिदं यदीह परिभूषामात्रमाकल्पयेज्जायासत्यकबिम्बके यदि तथा सर्वं तयोश्चाचरेत्।। अथांशुकाद्यैः परिभूष्य बिम्बं नीराज्य कृत्वा वि’ ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

दुर्गाप्रार्थनमन्त्रे विशेषमाह पुनः - नमस्त इति। इत्यादिरूप इत्यादिस्वरूपः। दुर्गोपस्थानमन्त्रकः दुर्गाया उपस्थानमन्त्रः।।४२, ४३।।

विवरणम्

रहितेत्यादिरूप इति। 'रहिता योनिदोषैस्त्वमि'त्यादि। शेष उक्तः।।४३।।

अर्चामथावेष्ट्य सदर्भवस्त्रैरारोप्य, मन्त्री निपुणं रथादौ।
छत्रध्वजाद्यैर्बहुवाद्यहृद्यं जलाधिवासाय नयेच्च तीर्थम्।।४४।।

विमर्शिनी

अथार्चां सदर्भवस्त्रैरावेष्ट्य रथादौ याने। निपुणम् अप्रमादयुक्तमारोप्य। छत्रध्वजाद्यैः सह बहुवाद्यहृद्यं बहुभिर्वाद्यवादनेन हृद्यं मनोहरं यथा भवति तथा मन्त्री कनिक्रदादिमन्त्रं जपन् जलाधिवासाय तीर्थं नयेच्च।।४४।।

विवरणम्

सदर्भवस्त्रैरावेष्ट्येति। वस्त्रेण बिम्बं सर्वतः समाच्छाद्य तद्बहिर्दर्भैराच्छाद्य बन्धनं कार्यम्। मन्त्रीति कवचेनाच्छादनमुक्तम्। यद्वा स्वास्त्रेण तालत्रयादिकमुक्तम्। तथा शाकुनस्वस्तिसूक्तादिजपश्च। रथादाविति तदुचितयानाद्यभिप्रायम्। तीर्थमिति नदीतटाकादिविकल्पोपलक्षणम्।।४४।।

तीरेऽवतार्य[१] सलिलं सकलीकृतात्मा
संशोध्य तत्र वरुणं परिपूज्य देवम्।
तन्मन्त्रतश्च परिजप्य च वारुणाद्यं
कृत्वात्र बोधिफलकं प्रयजेत पीठम्।।४५।।

विमर्शिनी

तीरे बिम्बवतार्य सकलीकृतात्मा स्वस्य सकलीकरणादि कृत्वा। सलिलं शोषणादिभिः संशोध्य। तत्र वरुणं तन्मन्त्रतः स्वमूलतो देवं च परिपूज्य। वारुणाद्यं

---

१. 'र्य परिशोध्य च धारणाभिस्तीर्याम्बुपीठमभिपूज्य जलाधिनाथम्। मन्त्री स्वमन्त्रकृतसन्निधिमर्चयित्वा तत्र स्वमूलमनुना प्रयजेच्च देवम्।। पञ्चवारुणजपा(दि) भाविते वारिणीह फलकं सकूर्चकम्। न्यस्य बिम्बविनिवेशनाय तत्रार्चयेच्च निजयोगविष्टरम्।।' इ। ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

पञ्चवारुणात्मकं परिजप्य। अत्र बोधिफलकं कृत्वा अश्वत्थनिर्मितां सकूर्चां फलकां विन्यस्य तत्र पीठं प्रयजेत।।४५।।

विवरणम्

तीरेऽवतार्येति। जलतीरे मार्जनादिशोधिते तामर्चां भद्रासने जलाभिमुखतया निधायेत्यर्थः। सलिलं संशोध्येति। जलेऽस्त्रप्रोक्षणं तालत्रयादिकरणं शोषणादिकं चोक्तम्। नाभिदध्ने जले चतुष्पदीं प्रपां विधाप्य तत्रैतत्सर्वं कार्यम्। तत्र वरुणं परिपूज्येति। तन्मन्त्रत इति सम्बन्धनीयम्।

"सुधा कुमुदिनी पूर्णा वारुणी विश्वतोमुखी।
तरङ्गिणी च सुरसा सुशीलाप्यायिनी क्रमात्।"

इति नव शक्तयः। सर्वशक्तिकमलासनाय नम इति समष्टिमन्त्रः। ओं वं वरुणाय नम इति मूलम्। वां वीमित्यादिभिरङ्गानि। अङ्गाष्टनागेन्द्रादिवज्रादिभिरावरणपूजा। 'ध्रुवासु त्वास्वि'ति वा मन्त्रः। 'अष्टभिः सप्तभिः षड्भिः पुनस्तावद्भिरक्षरैः' इत्यङ्गानि। स्वच्छांशुकाभरणपाशाङ्कुशाभयवरकरस्वच्छपद्मस्थितो ध्येय इति। देवमिति। तन्मन्त्रतः परिपूज्येति समानम्। परिजप्य च वारुणाद्यमिति। 'तत्त्वेमम्मेऽवतेहेलस्त्वन्नो अग्न उदुत्तममि'ति पञ्च वारुणानि। गङ्गे च यमुने चैवेत्यादि।

"इमा आपश्शिवास्सन्तु शुभाः शुद्धाश्च निर्मलाः।
पावनाः शीतलास्सन्तु पूतास्सूर्यस्य रश्मिभिः।।

इति। त्रिपञ्चसप्तवारं पूनर्मूलं चासकृज्जपेदित्यर्थः। कृत्वात्र बोधिफलकमिति। अत्र जलेऽश्वत्थकृतं फलकं निधायेत्यर्थः। तस्मिन्नस्त्रप्रोक्षिते कूर्चं न्यस्य तत्तत्पीठं पूजयेत्।।४५।।

ह्लामादिस्वस्वबीजोर्ध्वगतनतिपरायाक्षरोद्यत्पृथिव्या-
द्याख्योद्भिन्नात्मने हूं फडिति मनुमुदीर्यासुमुद्घातवृत्त्या।
आयम्यानेन हुंफट्पदकृतनमसोद्व्याप्य हृत्वा धराद्यं
ज्योतीरूपां ध्रुवेण प्रतिकृतिमुदके वासयेत् प्राक्शिरस्काम्।।

विमर्शिनी

अत्र पूर्ववेष्टितानि वस्त्रादीन्यपास्याभिषिच्यालङ्कृत्य ह्लामादिस्वस्वबीजोर्ध्वागत-

Shripuram Publications
www.shripuram.org

नतिपरायाक्षरोद्यत्पृथिव्याद्याख्योद्भिन्नात्मने हुंफडिति ह्लामित्यादिस्वस्वबीजानाम् ऊर्ध्वगतैर्नतिर्नम इति परायेत्यक्षरैश्चोद्गच्छद्भिः पृथिव्याद्याख्यामुक्तैश्च आत्मने हुं फडित्यक्षरैर्मनुमुदीर्य। 'ह्लां नमः पराय पृथिव्यात्मने हुं फट्', 'ह्लीं नमः पराय अबात्मने हुं फट्', 'ह्लूं नमः पराय तेजआत्मने हुं फट्', ह्लैं नमः पराय वाय्वात्मने हुं फट्', ह्लौं नमः परायाकाशात्मने हुं फड्' इति मन्त्रानुदीर्येत्यर्थः। उद्घातवृत्त्या भूतानां स्वस्वगुणानुरूपिणी सङ्ख्योद्धाता वृत्तिः, तयासुं प्राणमायम्य हुंफट्पदकृतनमसा हुं फडिति पदे स्थापितेन नमः वदेन। 'ह्लां नमः पराय पृथिव्यात्मने नमः' इत्यादिनानेन उद्व्याप्य पादाग्रादिनाभ्यन्तं तदादिहृदयान्तं तदादिकण्ठान्तं तदादिताल्वन्तं तदादिमूर्ध्वान्तं चोर्ध्वमूर्ध्वं तदा तदा व्याप्य धराद्यं पृथिव्याद्यं च हृत्वा संहृत्य शोषणदाहने च स्वस्वबीजाभ्यां कृत्वा ज्योतीरूपामग्निमयीं[१] प्रतिकृतिं प्रतिमां वस्त्रादिभिराच्छाद्य ध्रुवेण प्राक्छिरस्कामुदके वासयेत्।।४६।।

विवरणम्

ह्लामित्यादि पृथिव्यादीनां स्वस्वबीजानि ह्लां ह्लीं ह्लूं ह्लैं ह्लौं इत्येतानि तदूर्ध्वगतानि नतियुक्तानि परायेत्यक्षराणि तत उद्यन्त्यः पृथिव्याद्याख्याः पृथिव्यप्तेजोवाय्वाकाशपदानि ताभिरुद्भिन्नमात्मने हुंफटितीदृशम्। मनुमुदीर्येति। यथा - ओं ह्लां नमः पराय पृथिव्यात्मने हुं फडित्यादि। शिवे, ह्लां नमशिवायेत्यादि पठनीयम्। वक्ष्यति च - "योज्यं चैतेषां परांशे शिवार्णमि"ति। उद्धातवृत्त्या असुमायम्येति मन्त्रोक्तिसमये व्यापारोऽयमुक्तः। असुः प्राणः। उद्घातवृत्त्या तत्तद्गुणसङ्ख्ययेत्यर्थः। यद्वक्ष्यति - "तत्त्वावृत्तिप्रजप्तस्वमनुः" इत्यादि। तत्सर्वमिहापि समानम्। हुंफट्पदकृतनमसा अनेनोद्वाप्येति। ह्लां नमः पराय पृथिव्यात्मने नमः इत्यादि उद्व्यापनं संहारव्यापकम्। धराद्यं हृत्वेति। धरा पृथिवी तदादीनि भूतानि संहृत्येत्यर्थः। ज्योतीरूपां प्रतिकृतिमिति। तेजोरूपतां नीतां तां प्रतिमाम्। त्रिधा चैतत् सम्भवति। अप्सु संहारे कृते तेजोभावनया, शोषणे कृते दाहने, वायुसर्गानन्तरं तेजोभावनयेति। तेषामिह विकल्पः। प्राक् पूजितफलके शाययित्वा नाभिदघ्ने तस्मिञ्जले प्रणवेनाधिवासयेत्। प्राक्शिरस्कामिति। नान्योऽत्र नियम इति भावः। यथोक्तम्-

"वेष्टितं वसनैर्दर्भैः प्राक्शीर्षं चोर्ध्वसूत्रकम्" इति। फलकोपर्यधोमुखं सर्वत्र शाययेदुत्तानं वेति।।४६।।

---

१. 'वीं प्रतिमां' ख. पाठः

Shripuram Publications
www.shripuram.org

[1]रक्षां कृत्वा पञ्चमन्त्रैः समन्तात्
[2]सास्त्रैर्दिक्पांस्तद्बहिः संविभाव्य।
दीपानग्निं[3] जागरूकांश्च पुंस-
स्तत्रारक्षेत् स्थापयित्वा त्रिरात्रम्।।४७।।

विमर्शिनी

पुनः स्वस्वपदे[4][5] पञ्चमन्त्रैः समन्ताद् दिक्षूर्ध्वान्तं सास्त्रैरस्त्रेण च रक्षां कृत्वा तद्बहिर्दिक्पान् संविभाव्य कल्पयित्वा दीपानग्निं जागरूकान् उन्निद्रान् पुंसः पुरुषांश्च तत्र स्थापयित्वा त्रिरात्रमारक्षेत्।।४७।।

विवरणम्

रक्षां कृत्वा पञ्चमन्त्रैः समन्तादिति निजनिजपञ्चतत्त्वग्रहणम्। मध्ये परमेष्ठितत्त्वम्। प्रागादिषु पुरुषादितत्त्वानि। यद्वा, बिम्बस्य समन्ततः सर्वतत्त्वम्। तद्बहिस्समन्ततो निवृत्तितत्त्वमित्यादि। शिवे पञ्च ब्रह्माणि ग्राह्याणि, न्यासपूजार्घ्यदानान्येषां कार्याणि। सास्त्रैरिति। तद्बहिस्समन्तादस्त्रं पञ्जराकारेण विभावनीयम्। न्यासपूजार्घ्यदान[6]-जपा इहापि तुल्या एव। दिक्पास्तद्बहिस्संविभाव्येति दशसु दिक्षु तेषां सन्निधापनपूजार्घ्य-दानान्युक्तानि। तत्र स्थापयित्वा आरक्षेदित्यन्वय इति।।४७।।

प्रासादं परिगृह्य कारुकरतः कर्त्रा गुरुः प्रार्पितं
पर्येत्य प्रयतोऽथ रात्रिसमये सङ्गृह्य संशोध्य च।
एतद्दक्षिणतो निषद्य सकलीकृत्यार्चितात्माग्रतो
विघ्नेशं प्रसमर्च्य बीजमनुना निर्विघ्नतां प्रार्थयेत्।।४८।।

विमर्शिनी

एवं बिम्बं परिगृह्य जलाधिवासं कृत्वा ततः प्रासादमपि परिगृह्य शोधयेदित्याह - प्रासादमिति। अथ जलाधिवासानन्तरं गुरुः प्रयतः शुद्धो भूत्वा कर्त्रा यजमानेन कारुकरतः परिगृह्य प्रार्पितं दत्तं प्रासादं रात्रिसमये पर्येत्य परितः स्वयं गत्वा ऊनातिरेकं निरीक्ष्य संगृह्य संशोध्य तदन्तर्बहिश्च मार्जनालेपनाभ्यां शोधयित्वा एतद्दक्षिणतः प्रासादस्य

---

१. 'दिक्षूर्ध्वान्तं पञ्च मन्त्रान् यथार्हं दिक्पानस्त्रार्चिश्च विष्वग् वि' ख. पाठः, २. 'स्वा', ३. 'ग्नीन् जा' क.पाठः, ४. 'स्वपञ्च' ख.पाठः, ५. 'दे. म' क.पाठः, ६. 'नभवा इ' ख.पाठः

www.shripuram.org

दक्षिणभागे निषद्योपविश्य सकलीकृत्य शङ्खपूरणपूर्वमर्चितात्मा कृतात्माराधनो भूत्वाग्रतो बीजमनुना गणपतिबीजेन विघ्नेशं प्रसमर्च्य तं प्रति निर्विघ्नतां प्रार्थयेत्।।४८।।

विवरणम्

इदानीं प्रासादशुद्धिं प्रस्तौति - प्रासादं परिगृह्येति। कतमदिन एतत् कर्तव्यमिति। बिम्बाधिवासतः पूर्वदिने। वक्ष्यति च - 'तत्स्नपनतः पूर्वेऽह्नी'ति। किं च बिम्बाधिवासदिने प्रासादस्याप्यधिवासं वक्ष्यति 'पीठाधिवाससमये विहिताधिवासमि'ति। अतस्ततोऽपि प्रागेव तच्छोधनोपपत्तिः। अथ प्रासादं कारुकरतः परिगृह्य कर्त्रा प्रार्पितं गुरुः पर्येत्य सङ्गृह्येति योजना। कारुस्तक्षा। बिम्बपरिग्रह[1]वत् प्रासादपरिग्रहप्रकारः। प्रयतः शुद्धः। स्नानादिकृदिति यावत्। गुरुस्तद्दिनेऽपराह्ने स्नानादि कृत्वा सभायामन्यत्र वा उपविश्य सकलीकरणमात्रं विधाय गणपतिं सम्पूज्य कर्त्रा परिगृहीते प्रासादे तन्मुखदिगादितदन्तं प्रदक्षिणं परीत्य तदग्रतस्तिष्ठन् तं प्रासादं कर्तृसकाशात् प्रणवेन आलोक्य दर्भेण स्पृश[2]न् प्लुतप्रणवेन परिगृह्णीयादिति। कारुकरत इति तेन सन्ताड्य मुक्तमात्रे कर्त्रा परिग्रह उक्तः। संशोध्य चेति। यद्यपि साधु मार्जनादिपरिशोधितस्यैवायं परिग्रहः, किन्तु परिगृहीतस्य पुनस्तलक्षालनादि सर्वमस्त्रेण कार्यमिति भावः। एतद्दक्षिणतो निषद्येति। प्राग्द्वारे प्रासादेऽन्तर्मण्डलान्तरे वा याम्यबलिपीठपुरतः प्रत्यग्द्वारे तत्पश्चिमत इति ज्ञेयम्। मण्डप एव वा। यथोक्तं गुरुराचम्य मण्डप उपविश्येत्यादि। निषदनमुपवेशनम्। सकलीकृत्येति। आत्मानमिति शेषः। अग्रतो बीजमनुना विघ्नेशं प्रसमर्च्येति। स्वस्तिकेऽष्टदलपद्मे वा विधिवद् गणपतेः स्वबीजमन्त्रेण पूजोक्ता। निर्विघ्नतां प्रार्थयेदिति। प्रतिष्ठापनपर्यन्तमियं निर्विघ्नताभिप्रेयते।।४८।।

ततः समास्तीर्णकुशेषु सादितं
त्रिसूत्रकाद्यक्षतसूनपश्चिमम्।
विशोधितं धारणया ध्रुवार्चितं
परामृशेत् स्वैर्मनुभिर्यथाक्रमम्।।४९।।

विमर्शिनी

ततः समास्तीर्णकुशेषु सादितं त्रिसूत्रकाद्यक्षतसूनपश्चिमं त्रितन्त्वाद्यक्षतपुष्पान्तिमं

---

१. 'हतत्प्रासा', २. 'शेत् प्लु' क. पाठः

Shripuram Publications
www.shripuram.org

द्रव्यजातं धारणया शोषणादिभिर्विशोधितं ध्रुवार्चितं तत् स्वैर्वक्ष्यमाणैर्मनुभिर्यथाक्रमं परामृशेत् संस्पृश्य जपेत्।।४९।।

विवरणम्

ततः समास्तीर्णकुशेषु सादितमिति। स्वाग्रत उदग्भागे दक्षिणभागे वा दर्भसंस्तरे सादितं प्रणवेन क्रमतः सादनमिष्यते। त्रिसूत्रकं त्रिगुणितसूत्रकम्। धारणया विशोधितमिति शोषणादिकमुक्तम्। अस्त्रप्रोक्षणपूर्वकमेतत् कर्तव्यम्। ध्रुवार्चितम्। पुनः प्रणवेन पूजितम्। स्वैर्मनुभिरिति। व्यस्ताव्यस्तप्रणवादिभिः।।४९।।

सूत्रं प्राक् त्रिवृतं कुशस्रजमथो मुष्ट्या शकृद्वारि वा
पश्चात् सर्षपमुष्टिगोमयजलं गव्यं क्रमात् तत्परम्।
कुर्याद्वा विकिरं समुष्टिकमथो गन्धाम्बु पुष्पाक्षतं
दर्भाग्रान्वितमन्ततो विकिरवापेऽन्ते तु तत्सादनम्।।५०।।

विमर्शिनी

द्रव्याण्याह - सूत्रमिति। प्राक् पूर्वं त्रिवृतं त्रिगुणितं सूत्रं कुशस्रजं चाथो मुष्ट्या सह शकृद्वारि गोमयजलं वा विकल्पेन, पश्चात् सर्षपमुष्टिगोमयजलं सर्षपं मुष्टिं गोमयजलं पञ्चगव्यं च क्रमात्, तत्परं विकिरं समुष्टिकं वा विकिरमुष्टिं च विकल्पेन कुर्यात्। अथ गन्धाम्बु दर्भाग्रान्वितं पुष्पाक्षतं च कुर्यात् संपातयेत्[1]। अन्ततः अवसाने विकिरवापे पक्षे तु तत्सादनं चान्ते कुर्यात्।।५०।।

विवरणम्

प्राक् त्रिवृतं सूत्रमित्यन्वयः। कुर्यादिति च सम्बध्यते। त्रिवृतं त्रिगुणितम्। कुशस्रजमिति। दर्भमालाम्। मुष्ट्या शकृद्वारि वेति। सहार्थे तृतीया। मुष्टिगोमयजले कुर्याद्वा नवेत्यर्थः। तत्परं कुर्याद्वा विकिरं समुष्टिकमिति। विकिरमुष्ट्योस्सहविकल्पः। पुष्पाक्षतं दर्भाग्रान्वितमित्येकं सन्धानमुक्तम्। अन्ततो विकिरवाप इति। यदा गव्यानन्तरं विकिरमुष्टी न स्तस्तदा धूपदीपकमपि प्रकल्प्य परित इत्येतदन्त एव विकिरकर्म कार्यम्। तदा चाक्षतान्ते विकिरसादनमपि कार्यम्। नत्विह मुष्टिरतीत्यभिप्रायः।।५०।।

---

१. 'द' क. पाठः

Shripuram Publications
www.shripuram.org

व्यस्ताव्यस्तनिरञ्जनं त्रिगुणदाम्नोर्यं त्रिमुष्ट्यां शकृ-
त्तोयं वं सितसर्षपे रमथवा सैंहं हरौ मन्त्रवित्।
गव्ये पञ्च जपेन्मनून् विकिरकाद्येषु स्वमूलं हरा-
वर्काणं विकिरे त्रितन्तुषु तनुत्रं[1] गव्यमन्वस्त्रकम्।।५१।।

विमर्शिनी

तन्मन्त्रानाह - व्यस्ताव्यस्तेति। मन्त्रविद् मन्त्रविशेषज्ञो गुरुः त्रिगुणदाम्नोः त्रिसूत्रदर्भस्रजोः व्यस्ताव्यस्तनिरञ्जनं पृथग्भूतमपृथग्भूतं प्रणवं जपेत्। त्रिमुष्ट्यां मुष्टित्रये यमिति बीजं, शकृत्तोये वं बीजं, सितसर्षपे सिताः सर्षपा मुख्या इति सितसर्षप इत्युक्तं, तत्र रं बीजं, हरौ अथवा सैंहं क्ष्रौं[2]मिति नरसिंहबीजं, गव्ये निजान् पञ्च मन्त्रान्, विकिरकाद्येषु स्वस्वमूलं, हरौ विकिरेऽर्काणं द्वादशाक्षरं, त्रितन्तुषु तनुत्रं कवचं वा, गव्यमनु गव्येऽस्त्रकं च जपेत्।।५१।।

विवरणम्

व्यस्ताव्यस्तनिरञ्जनं त्रिगुणदाम्नोरिति। निरञ्जनं प्रणवः, त्रिगुणं त्रिगुणितसूत्रं, तस्मिन् व्यस्तप्रणवं जपेत्। दाम दर्भमाला, तत्र समस्तप्रणवं जपेत्। यं त्रिमुष्ट्यामिति। मुष्टित्रये वायुबीजम्। शकृत्तोये वमिति। गोमयजलद्वयेऽपि वरुणबीजम्। सितसर्षपे रमिति। सितास्सर्षपा मुख्याः। सर्षपे चाग्निबीजमित्यर्थः। अथवा सैंहं हराविति। सर्षपे नरसिंहबीजं वेत्यर्थः। मन्त्रविदिति विकिरणे फडन्तत्वमुक्तम्। यद्वा, सर्वेष्वप्यस्त्र-विकल्प उक्तः। यदुक्तं - हरौ "सर्षपानस्त्रमन्त्रितानि"ति, शिवादिष्वपि "सर्षपानस्त्रमन्त्रतः", सर्षपानस्त्रसञ्जप्तानि"त्यादि। गव्ये पञ्च जपेन्मनूनिति। विष्णौ वासुदेवादिनारायणान्तं मनवः ते च कर्मशेषपटलभाविनः। शिवे तु ईशानादि पञ्च ब्रह्माणि। हरिहरे द्वयान्यपि। पञ्चतत्त्वानि इतरेषु स्युः। पञ्चगव्यानां योजनक्लृप्तिस्तु निष्कृतिपटले वक्ष्यते - 'गोमूत्रं निजवाञ्छया परिमितमि'त्यादि। विकिरकाद्येषु स्वमूलमिति। विकिरगन्धोदकाक्षतेषु धूपदीपयोरपि सादने तयोरपि मूलम्। मुष्टौ तु वायुबीजं, यं त्रिमुष्ट्यामिति ह्युक्तम्। हरावर्काणं विकिर इति। द्वादशाक्षरं मङ्गलाङ्कुरोक्तबीजैस्सर्वेषु विकिरसादनम्। स्कन्दे तु "विकिरमिह व्रीहियव"मित्यादि निष्कृतिवक्ष्यमाणं ग्राह्यम्। *त्रितन्तुषु तनुत्रं वेति। शिवादौ त्रिगुणितसूत्रे कवचं वेत्यर्थः। गव्येऽस्त्रकमिति। वेत्यनुषङ्गः। शिवादिष्वेव

---

१. 'त्रं वापि गव्येऽस्त्र' ग. पाठः', २. 'क्षौ' क. पाठः।
* 'त्रितन्तुषु तनुत्रं वापि गव्येऽस्त्रकम्' इति विवरणपाठः

Shripuram Publications
www.shripuram.org

पञ्चगव्येऽस्त्रं वा जपेदित्यर्थः। अपि गव्य इति। दुर्गास्कन्दयोर्दर्भमालादि, सर्वेष्वप्यस्त्रविकल्पोऽपि सूचितः। विकिरे तु मूलमेवेष्यते। यदुक्तम् - 'विकिरान् जपेदष्टोत्तरं शतं मूलमन्त्रमि'ति।।५१।।

दत्त्वा धेनूर्द्विजेभ्यो द्विरदवनमुद्वास्य तद्देवतात्मा
स्थित्वा द्वारोपकण्ठे विभुसदनमदः प्रेक्ष्य दृष्ट्यास्त्रमय्या।
फट्कारान्तेन तारेण च चुलुकभृतैरष्टताराभिजप्तैः
पाथोभिः प्रोक्ष्य रक्षःप्रकरमिह कृतावासमुत्सारयेच्च।।५२।।

विमर्शिनी

पुनर्द्विजेभ्यो धेनूर्दत्त्वा द्विरदवदन गणपतिमुद्वास्य तद्देवतात्मा गुरुः स्वयं देवो भूत्वा द्वारोपकण्ठे प्रासादद्वारसमीपे स्थित्वा अदः एतद् विभुसदनं देवालयम् अस्त्रमय्या अस्त्रतेजः प्रसारिण्या दृष्ट्या प्रेक्ष्य चुलुकभृतैर्निजदक्षिणकरचुलुकगृहीतैः अष्टताराभिजप्तैः पाथोभिर्जलैः फट्कारान्तेन तारेण प्रोक्ष्य इह कृतावासं कृतस्थानीयकं रक्षःप्रकरं राक्षससमूहं उत्सारयेद् अपसारयेच्च।।५२।।

विवरणम्

दत्त्वा धेनूर्द्विजेभ्य इति। चतुरवरं पशुदानमुक्तम्। द्विरदवदनमुद्वास्येति। अवसानीयार्घ्यदानादिपूर्वकं गणपतिरुद्वासनीयः। तद्देवतात्मेति। मूलमन्त्रप्राणायामाङ्गादिन्यासमानसपूजाजपैरिति शेषः। स्थित्वा द्वारोपकण्ठ इति। प्रासादद्वारसन्निधौ बहिरेव तदभिमुखं स्थित्वेत्यर्थः। अदो विभुसदनमस्त्रमय्या दृष्ट्या प्रेक्ष्येत्यन्वयः। दृष्ट्योरस्त्रभावनास्त्रोच्चारणमपि कार्यम्। प्रासादशरीरे तदन्तर्गर्भगृहे चैतदीक्षणं भवति। चुलुकभृतैरष्टताराभिजप्तैः पाथोभिः फट्कारान्तेन तारेण च प्रोक्ष्येत्यन्वयः। दक्षिणकरपुटे शङ्खाज्जलं सम्पाद्य वामहस्तेन स्पृशन् प्रणवेनष्टवारमभिमन्त्र्य तेन फडन्तप्रणवेन प्रासादशरीरं प्रोक्ष्येत्यर्थः। रक्षःप्रकरं रक्षसां समूहम्। उत्सारणमपनयनम्। भावनैवेयं भवति।।५२।।

ईशादीशदिगन्तिमं गुणकुशस्रग्भ्यां कपोतोपरि
प्रासादं परिवेष्ट्य दिष्टमनुना मुष्ट्यांद्वयान्तर्बहिः।[1]
सम्मृज्य प्रसमुक्ष्य गोमयजलेनोत्कीर्य सिद्धार्थकान्

---

१. 'ष्ट्या तथान्त' इति मूलकोशपाठः

www.shripuram.org

मार्जन्या परिमृज्य सिञ्चतु शकृत्तोयेन गव्येन च।।५३।।

विमर्शिनी

ततः[1] प्रासादं कपोतोपरिभागे गुणकुशस्रग्भ्यामीशादीशदिगन्तिमं दिष्टमनुना निर्दिष्टमन्त्रेण परिवेष्ट्य परितो वेष्टयित्वा। दिष्टमनुनेति सर्वत्र योज्यम्। आद्यया मुष्ट्यान्तर्बहिश्च संमृज्य गोमयजलेन समुक्ष्य सिद्धार्थकानुत्कीर्य मार्जन्या मुष्ट्या परिमृज्य शकृत्तोयेन गव्येन च सिञ्चतु।।५३।।

विवरणम्

दिष्टमनुनेति सर्वक्रियाभिः सम्बध्यते। जपोपदिष्टेन मन्त्रेणेत्यर्थः। प्रासादस्य कपोतपङ्क्त्युपरिभागे त्रिगुणसूत्रदर्भमालाभ्यामीशदिगादितदवसानं व्यस्तसमस्तप्रणवजपेन परिवेष्टयेत्। मुष्ट्याद्ययान्तर्बहिः समृज्येति। प्रथममुष्ट्या वायुबीजेन गर्भगृहेऽग्न्यादीशान्तं पुनर्नाडीगृहे बहिरधिष्ठानेऽपि द्वारादितदन्तं परिमृज्यम्। करक्षाळनमन्तरान्तरा कार्यमिति ज्ञेयम्। समुक्ष्य गोमयजलेनेति। क्वचिच्छुद्धजलमपीष्यते। यदुक्तम् -

"ततो गोमयवारिभ्यां गायत्र्या चोपलेपयेत्।"

इति। उत्कीर्य सिद्धार्थकानिति। विष्णौ फडन्तेन नरसिंहबीजेन। अन्येषु रं बीजेन स्वास्त्रेण वान्तर्बहिर्विकिरणं[2] कार्यम्। उत्कीर्येति वोपरि किरणमप्युक्तम्। तेन प्रागादिदशदिक्षु सर्वतस्सर्षपविकिरणमपि सूचितम्। यदुक्तम्-

"नृसिंहेन फडन्तेन विकिरेद्दशदिक्ष्वपि।"

इति। मार्जन्या परिमृज्येति द्वितीयमुष्ट्या। सिञ्चतु शकृत्तोयेन गव्येन चेति। पूर्वं गोमयजलेन पुनः पञ्चगव्येन च जपोक्तमनुजापी प्रोक्षेत्। प्राग्वत् क्वचिच्छुद्धजल-योगः।।५३।।

त्रेधा च प्रविकीर्य तत्र विकिरान् संमृज्य वापोणुना
वोक्षेद् गन्धजलैः किरेत् पुनरिषेत्वेत्यादिना वाक्षतैः।
धूपं[3] दीपमपि प्रकल्प्य परितो मूलेन गर्भालये-
ऽथे[4]शेऽग्नावनिलेऽथवास्त्रमुदकुम्भेऽधोग्रकूर्चेऽर्चयेत्।।५४।।

---

१. 'त्र प्रा' ख. पाठः', २. 'णमुक्तम्। व' घ. पाठः।, ३.'धूपाद्यं च समर्पयेद् विकिरकर्मान्ते तथा सादनेऽथैशे' ख. पाठः, ४. 'थे' क. ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

तत्र विकिरानञ्जलिना त्रिधा च विकीर्य पुनर्मुष्ट्या संमृज्य वा गन्धजलैरापोणुना 'आपः पुनन्त्वि'त्यादिमन्त्रेण वा मूलेन वोक्षेत्। पुनः 'इषे त्वे'त्यादिना वा मूलेन वाक्षतैः किरेत्। परितो धूपं दीपमपि मूलेन प्रकल्प्याथ गर्भालये ईशे अग्नौ अथवानिले कोणे अधोग्र[1]कूर्चे उदकुम्भे उदकपूर्णे कुम्भे अस्त्रं स्वस्वास्त्रमावाह्यार्चयेत्।।५४।।

विवरणम्

त्रेधा च प्रविकीर्य तत्र विकिरानिति। प्रासादान्तस्त्रेधा पुनर्बहिश्च विकिरान् विकिरेदित्यर्थः। विकिरणक्लृप्तिस्तु मण्डपसंस्कारे द्रष्टव्याम्। 'प्रागास्योऽञ्जलिना त्रिधात्र विकिराञ्छक्त्यात्मनि प्रोत्किरेदि'ति। शिवे प्रासादेन इतरेषु मूलेन च प्रासादमूर्ति विभाव्यैतत् कार्यम्। इह विकिरणक्लृप्त्यनभिधानादिह तदनियमोऽपि लभ्यते। संमृज्य चेति। तृतीयमुष्ट्येति भावः। आपोणुना वोक्षेत् गन्धजलैरिति। शिवशास्त्रादावयम् 'आपः पुनन्त्वि'ति मन्त्रविकल्पः। गन्धजलैर्वोक्षेच्चेति वा चशब्दो योज्यते। पूर्वं गन्धजलैरालेपनमनेन सूचितम्। तदुक्तं - 'गन्धोदैर्लिप्त्वाथापः पुनन्त्विति भूयोऽपि ताभिः संप्रोक्ष्ये'ति। किरेत्। पुनरिषेत्वेत्यादिना वाक्षतैरिति शिवशास्त्रादावेवायं मन्त्रविकल्पः। दर्भाग्रपुष्पमिश्राणामेवाक्षतानामेतद् ग्रहणम्। धूपं दीपमपि प्रकल्प्य परितो मूलेनेति। यदुक्तं - 'धूपदीपौ च विन्यस्येदि'ति।

"साराङ्गारविनिक्षिप्तगुल्गुल्वगरुवासितम्।
धूपं दत्त्वाऽभितो दीपमपि प्रज्वाल्य विन्यसेत्।।"

इति। अथ गर्भालये ईशेऽग्नावनिलेऽथवा अधोग्रकूर्च उदकुम्भेऽर्चयेदिति। क्षालितस्थले स्वस्तिकामालिख्य व्रीहिदर्भपीठे तत्तत्पीठपूजापूर्वकं संस्कृते कुम्भेऽधोग्रं कूर्चं निक्षिप्य शुद्धाम्बुपूर्णे स्वास्त्रमावाह्य विधिवत् पूजयेत्। प्रतिष्ठावसितावस्य देवस्य उद्वासनं भवतीति बोद्धव्यं रक्षार्थत्वादस्येति।।५४।।

ईशेशाजितविघ्नशास्तृषु सदर्भब्रह्मशाखाकृता
मुष्टिः सैव गुहे सपिप्पलशिखाशाखाशलाकाकृता।
दुर्गाशाङ्गर्भृतोः सहाश्रितशलाकादर्भसन्दर्भिता
शाङ्गर्गीशे द्विजशाखया प्रकलिता विष्णूदिता वा भवेत्।।५५।।

---

[1]. 'ग्रे' क. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

मुष्टिलक्षणमाह - ईशेशेति। ईशेशाजितविघ्नशास्तृषु सदर्भब्रह्मशाखाकृता दर्भैः सह पलाशशाखया कृता मुष्टिर्भवेत्। गुहे सपिप्पलशिखाशाखाशलाकाकृता अश्वत्थाग्रशाखाभिः शलाकाभिश्च सह कृता सैव शैवादिषूक्तैव। दुर्गाशाङ्र्गभृतोः सहाश्रित-शलाकादर्भसन्दर्भिता सहायुक्ताभिः शलाकाभिश्च सह कृता दर्भैश्च बद्धा। (സഹാ= പൂവാംകുരുന്തൽ, ശലാകാ=തെങ്ങീർക്കിൽ) शाङ्र्गीशे द्विजशाखया पलाशशाखया सह प्रकलिता विष्णूदिता वा।।५५।।

विवरणम्

इदानीमुक्तशोधनसाधनेषु मुष्टिरलौकिकीति तल्लक्षणं कथयति - ईशेशाजितविध्न-शास्तृष्विति। सदर्भब्रह्मशाखाकृतेति। दर्भैः पलाशशाखया निबद्धा। सैव गुहे सपिप्पलशिखा-शाखाशलाकाकृतेति। यदुक्तं -

"पलाशाश्वत्थशाखाभिश्शलाकैर्दर्भमिश्रितैः।
मुष्टिं कृत्वा"

इति। दुर्गाशाङ्र्गभृतोरिति। सहाशलाकादर्भैर्निबद्धा मुष्टिरित्यर्थः। शाङ्र्गीश इति। पलाशशाखान्विततया कृता। विष्णूक्तमुष्टिर्वा। पूर्वोक्तेव वा मुष्टिरित्यर्थः।।५५।।

चक्रं चक्रिनिसुम्भजिद्धरिहरेऽघोरं गणेशेश्वरे
स्याद् वा पाशुपतं तदन्वितरथाङ्गं वास्त्रमीशाच्युते।
ज्वालामालिनिहुं ज्वलादिघृणिहुंफट् चेति सङ्कीर्तिते
अस्त्रे शक्तिधरार्ययोः स्वलिपिक्लृप्ताङ्गे तथाङ्गाक्षरे[१]।।५६।।

विमर्शिनी

अस्त्रमाह चक्रमिति। चक्रिनिसुम्भजिद्धरिहरे विष्णुदुर्गाशिवनारायणे चक्रं सुदर्शनमस्त्रं स्यात्। गणेशेश्वरे गणपतिशिवयोः अघोरं पाशुपतं वा। ईशाच्युते तदन्वितरथाङ्गं पाशुपतेन युक्तं सुदर्शनं वा। शक्तिधरार्ययोः क्रमेण ज्वालामालिनिहुं ज्वलादिघृणिहुंफट् ज्वलघृणिहुंफडिति च, स्वलिपिक्लृप्ताङ्गे स्वैः स्वैः षड्भिरक्षरैः कल्पिताङ्गयुक्ते, तथाङ्गाक्षरे षड्भिः षड्भिरक्षरेण च युक्ते अस्त्रे सङ्कीर्तिते।।५६।।

---

१. 'रे।। कृणुष्वपाजः प्रमुखाणुजापं कृत्वा सकृत् साष्टशतं तथास्त्रम्। संजप्य संरक्ष्यं गृहं प्रकुर्यात् राक्षोघ्नहोमं बहिरग्निकोणे।। पक्वं' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

चक्रमिति। अस्त्रं स्यादिति सर्वत्र सम्बध्यते। पाशुपतं वेति। गणेशेश्वर इत्यनुषङ्गः। तदन्वितरथाङ्गं वेति पाशुपतान्वितचक्रं वा प्रागुक्तकेवलचक्रं वेत्यर्थः। अस्त्रयोगे तदङ्गयोगोऽपि भवति। चक्रादीनां कर्मशेषपटल उद्धारः। शक्तिधरः स्कन्दः। स्वलिपिक्लृप्ताङ्गे इति। द्वयोरपि षड्भिस्स्वराक्षरैरङ्गानि। अङ्गाक्षरे इति। द्वे अपि षडक्षरे। अङ्गेन्द्रादिवज्रादिभिरस्त्राणाम् आवरणपूजा।।५६।।

गर्भालयेऽभ्यर्चितविष्टरेऽत्र[1]
प्रासादमन्त्रेण शिवे परेषु।
मूलेन देवं गृहमूर्तिरूपं
प्रकल्प्य साङ्गं प्रयजेद् दिगीशैः।।५७।।

विमर्शिनी

क्रियाशेषमाह - गर्भालय इति। गर्भालयेऽभ्यर्चितविष्टरे अत्र शिवे प्रासादमन्त्रेण, परेषु मूलेन च गृहमूर्तिरूपं देवं प्रकल्प्यावाह्य साङ्गम् अङ्गैर्युक्तं दिगीशैः सह प्रयजेत्।।५७।।

विवरणम्

*अभ्यर्चितदर्भक इति। क्षालिततले ह्रस्वदर्भसंस्तरं कृत्वा तत्रेत्यर्थः। गृहमूर्तिरूपं देवं प्रकल्प्येति। स्वपीठपूजापूर्वकमुक्तमन्त्रेणावाह्य लिपिवत्त्वमन्त्राङ्गन्यासविधानमुक्तम्। साङ्गं प्रयजेद् दिगीशैरिति। मूलाङ्गैर्विग्रहपूजाङ्गेन्द्रादिवज्रादिभिरावरणपूजोक्ता। निवेद्यसमयेऽर्घ्यं दत्वा प्रसन्नपूजामपि विदध्यात्।।५७।।

जपेत् कृणुष्वाद्यसकृत् तथाष्ट-
शतं निजास्त्रं च विकीर्य राज्या।
गव्यैरुत प्रोक्ष्य गृहं प्ररक्षेत्
पुष्पास्त्रतालत्रयकल्पनाद्यैः।।५८।।

विमर्शिनी

'कृणुष्वा'दिमन्त्रजातमसकृत् प्रजपेत्। निजास्त्रं चाष्टशतं जपेत्। राज्या सर्षपेण

---

१. दर्भकेऽत्रे' क. पाठः

* 'गर्भालयेऽभ्यर्चितदर्भकेऽत्र' इति विवरणपाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विकीर्य गव्यैरुत प्रोक्ष्य वा पुष्पास्त्रतालत्रयकल्पनाद्यैः पुष्पा(स्त्रम?स्त्रैर) स्त्रंजप्तपुष्पैर्दिक्षु क्षेपणैः तालत्रयदिग्बन्धनाद्यैश्च गृहं प्ररक्षेत्।।५८।।

विवरणम्

जपेदिति। राक्षोघ्नास्त्रयोर्जपः। तदभिमन्त्रितसर्षपविकिरणं तन्मन्त्रैर्गव्यप्रोक्षणमिदमुभयं समुदितं वा कार्यमिति। विकिरान्तपक्षे तु अक्षतविकिरणानन्तरमेवं प्रासादमूर्तिं दर्भसंस्तरे विभाव्य गन्धमुष्पाभ्यां धूपदीपाभ्यां च तदादिप्रासादान्तर्बहिः पूजां विधाय निवेद्यस्थाने यथोक्तविकिरणमपि कार्यम्[1]। पुनस्तं प्रासादमूर्तिं पूजयेत्। ततोऽकलशपूजां राक्षोघ्नजपादिकं च कुर्यादिति। गृहं प्ररक्षेदिति। तत्रैव स्थित्वा पुष्पास्त्रमोचनं कुर्यात्। बहिर्निष्क्रम्य द्वारसम्मुखस्तालत्रयदिग्बन्धनाग्निप्राकारान् अस्त्रेण विदध्यादिति। पुष्पास्त्रमोचनमुक्तम् -

'अस्त्रमन्त्रेण पुष्पाणि दश दिक्षु प्रमोचयेत्।
नाराचमुद्रया तत्र शूलमुद्रां च दर्शयेत्।।'

इति। शिवे शूलमुद्रा विष्णवादिषु चक्रादिमुद्रेति ज्ञेयम्। पुनः प्राचीनासन उपविश्य आत्मनो लयाङ्गादि सर्वमर्थसिद्धमिति।।५८।।

ततो बहिः स्थण्डिलमारचय्य हुताशकोणे विनिधाय वह्निम्।
आध्वर्यवार्हाग्निमुखादिक्लृप्त्या रा[2]क्षोघ्नहोमं विदधीत विद्वान्।।५९।।

विमर्शिनी

ततो बहिर्हुताशकोणे स्थण्डिलमारचय्य वह्निं वि[3]निधाय। आध्वर्यवार्हाग्निमुखादिक्लृप्त्या, आध्वर्यवा यजुर्वेदिनः, तेषां योग्ययाग्निमुखादिक्लृप्त्या राक्षोघ्नहोमं विदधीत। विद्वानिति राक्षोघ्नहोमेन दुष्टराक्षसादीनां निबर्हणं विद्वानित्यर्थः।।५९।।

विवरणम्

राक्षोघ्नहोममाह - ततो बहिरिति। आध्वर्यवार्हाग्निमुखादिक्लृप्त्येति। आध्वर्यवं याजुषं चरणं तदर्हमग्निमुखं पक्वहोमप्रधानस्य आध्वर्यवत्वात्। आदिशब्देनोपरिष्टात् तन्त्रग्रहणम्। विद्वानित्यस्त्रमयाग्निप्रतिपत्त्यर्थम्। तदुक्तं - "अग्निं निधाय घोराग्निं ध्यायन्नग्निमुखं चरेत्" इति।।५९।।

---

१. 'कुर्यात्।' घ. पाठः, २. 'र' क. पाठः, ३. 'विधा' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

पक्वं रक्षोहणादिद्वयमयमनुनाज्यं कृणुष्वादिमन्त्रै-
र्येदेवाद्यैश्च दुर्गामनुभिरपि सभूरादिभिश्चाखिलेषु।
प्राग् भूरादेः स्वगुह्याणुभिरजितहरे मार्गजाज्यान्नसर्पी-
ष्यस्त्रेणाथाष्टयुक्तं शतमपि जुहुयात् सर्वतः सस्वपूर्णम्।।६०।।

विमर्शिनी

अखिलेषु रक्षोहणादिद्वयमयमनुना 'रक्षोहणं वाजिनं' 'विज्योतिषा बृहता' इति द्वयस्वरूपेण मन्त्रेण पक्वं जुहुयात्। कृणुष्वादिमन्त्रैरष्टादशभिर्येदेवाद्यैश्च पञ्चभिः दुर्गामनुभिः पञ्चभिर्दुर्गाभिश्च सभूरादिभीर्व्याहृतिभिरपि च आज्यं जुहुयात्। अजितहरे भूरादेः व्याहृतिभ्यः प्राक् स्वगुह्याणुभिः स्वपञ्चतत्त्वैश्च। अथ सर्वतः सर्वदेवेषु मार्गजाज्यान्नसर्पिषि, मार्गजोऽपामार्गः, अस्त्रेण स्वस्वास्त्रमन्त्रेणाष्टयुक्तं शतमपि सस्वपूर्णं स्वस्वपूर्णाहुतिसहितं यथा तथा जुहुयात्।।६०।।

विवरणम्

पक्वं रक्षोहणादिद्वयमयमनुनेति। रक्षोहणं वाजिनमिति पुरोनुवाक्यामुक्तौ प्रणवेन सन्धाय विज्योतिषेत्यृचा पक्वं जुहुयादिति द्वयमयपदाभिप्रायः। कृणुष्वादिमन्त्रैरित्याध्वर्यव-ग्रहणाद्यजुर्वेदाग्नातैरष्टादशभिरिति लभ्यते। येदेवाद्यैरिति। पञ्चभिः दुर्गामनुभिरिति। पञ्चदुर्गाभिः। प्राग् भूरादेरिति। पञ्चदुर्गानन्तरं स्वस्वपञ्चतत्त्वैरपीत्यर्थः। मार्गजेत्यपामार्ग-समिधः। सर्वत इति। सर्वेषु। सस्वपूर्णमिति। व्याहृतिहोमान्ते समिदादिचतुर्णां प्रत्येकमन्ते च व्योमव्याप्यादिनिजमन्त्रेण पूर्णाहुतिरपि कार्येत्यर्थः।।६०।।

होमान्ते खरमञ्जरीरसलसद्भस्मप्रणीताम्भसा
सम्पातेन शतास्त्रजापमहितेनोक्षेद् गृहं सर्वतः।
दर्भब्रह्ममयूरपिप्पलशिखाभिर्होममन्त्रैरमुं[1]
निक्षिप्यानलमेव वास्तुहवनं कुर्वीत शाव्यां दिशि।।६१।।

विमर्शिनी

होमान्ते स्विष्टकृदादिहोमावसाने। स्वरमञ्जरीरसलसद्भस्मप्रणीताम्भसा, स्वरमञ्ज-रीरसोऽपामार्गरसः, तेन मिलितेन भस्मना प्रणीताम्भसा च युक्तेन शतास्त्रजापमहितेन

१. 'मायूराग्रकुशादिभिः परिजपन् मन्त्रान् हुतोक्तानमुं', ख. पाठः

www.shripuram.org

शतावृत्त्यास्त्रजापात् सञ्जातमहितत्वेन सम्पातेन दर्भब्रह्ममयूरपिप्पलशिखाभिः दर्भपलाशापामार्गाश्वत्थशाखाभिः, होममन्त्रैः कृणुष्वाद्यैः गृहं सर्वतः सर्वप्रदेशेषूक्षेत्। अमुमेवानलं शार्व्यां दिशि निक्षिप्य वास्तुहवनं वास्तुहोमं कुर्वीत॥६१॥

विवरणम्

होमान्त इति। अग्निमुखादिक्लृप्त्येत्युक्तत्वात् स्विष्टकृदादिहोमशेषे कृत इति लभ्यते। खरमञ्जर्यपामार्गः, लसच्छब्देन व्यामिश्रितत्वमुक्तम्। खरमञ्जरीरसेन लसद्यत्र भस्मप्रणीताम्भश्चेति सम्पातविशेषणतया बहुव्रीहिः। पात्रसम्भृते सम्पातेऽपामार्गस्य रसं हुतभस्म प्रणीताजलं च संयोज्य अस्त्रेण अष्टोत्तरशतवारमभिमन्त्र्य तेन सम्पातेन प्रासादमन्तबहिश्च सर्वतः प्रोक्षेत्। दर्भब्रह्ममयूरपिप्पलशिखाभिरिति। दर्भान् पलाशापामार्गाश्वत्थानां शिखाश्च संग्रथ्य तेन प्रोक्षेदिति। होममन्त्रैरिति। कृणुष्वाद्यस्त्रान्तैरुक्तैरित्यर्थः। वास्तुहोमं प्रस्तौति - अमुमिति। अमुमेवानलं शार्व्यां दिशि निक्षिप्य वास्तुहवनं कुर्वीतेत्यन्वयः॥६१॥

पूर्वेण तं हुतवहं विरचय्य पीठं
शालीनवीनवसनामलतण्डुलाद्यैः।
दुर्वाशमीदलकुशोत्तरकूर्चचर्चि-
तेऽस्मिन् यजेत कलशौ परिधानतः प्राक्॥६२॥

विमर्शिनी

अत्र परिधानतः परिधिस्थापनात् प्राक् तं हुतवहं पूर्वेण तस्याग्नेः पूर्वभागे शालीनवीनसनामलतण्डुलाद्यैः शालीभिर्नवेन वस्त्रेणामलैस्तण्डुलतिलसिद्धार्थैश्च पीठं विरचय्य दूर्वाशमीदलकुशोत्तरकूर्चचर्चिते दूर्वाशमीदलकुशानामुपरि कूर्चेन चालङ्कृते अस्मिन् पीठे कलशौ यजेत॥६२॥

विवरणम्

पूर्वेण तं हुतवहमिति। तदुक्तम् - 'स्थण्डिलस्य भृशस्थाने कल्पिते स्थण्डिलद्वये' इति। नवीनवसनं नूतनवस्त्रम्। तण्डुलाद्यैरिति। तिलसर्षपग्रहणम्। चर्चनमलङ्करणम्। कलशौ यजेतेति॥६२॥

www.shripuram.org
Shripuram Publications
www.shripuram.org

न्यक्कूर्चेऽभ्यर्चयतु निजया विद्ययावाह्य विद्वान्[1]
प्रत्यक्संस्थे प्रकृतघटयोस्तण्डुलस्वर्णपूर्णे।
शन्नोदेव्या द्विरभिहितपादाङ्गयार्वात्र शान्तिं
प्राचीने च प्रयजतु तथा स्वर्णरत्नोदपूर्णे।।६३।।

विमर्शिनी

विद्वान् मन्त्रविशेषज्ञः प्रकृतघटयोः प्रस्तुतयोर्वास्तुकलशयोः प्रत्यक्संस्थे पश्चिमगते न्यक्कूर्चे अधोग्रकूर्चे तण्डुलस्वर्णपूर्णे तण्डुलेन स्वर्णेन च पूर्णे कुम्भे निजया विद्यया स्वस्वमूलेनावाह्य, देवमभ्यर्चयतु। तथा च प्रकृतघटयोः प्राचीने स्वर्णरत्नोदपूर्णे सुवर्णेन रत्नोदकैश्च पूर्णे अत्र कुम्भे द्विरभिहितपादाङ्गया द्विष्कृत्वा उच्चारणादुद्भूतैः षड्भिः पादैरङ्गानि यस्याः तया शन्नोदेव्या ऋचा शान्तिमावाह्य प्रयजतु।।६३।।

विवरणम्

कथमित्याह - न्यक्कूर्च इति। प्रकृतयोः कलशौ यजेतेति प्रक्रान्तयोर्घटयोर्मध्ये प्रत्यक्स्थिते घटेऽधोग्रं कूर्चं निक्षिप्य तण्डुलैस्सम्पूर्य सुवर्णं निक्षिप्य स्वमूलेनावाह्य पूजयेत्। पुनः प्राचीनघटे तथा न्यक्कूर्चे सुवर्णरत्नं निक्षिप्य तोयेन सम्पूरिते शन्नोदेवीरित्यनयर्चा शान्तिमावाह्य पूजयेत्। द्विरभिहितपादाङ्गयेति। द्विरभिहितायास्तस्याः षट् पादाः सम्पद्यन्ते। तैष्षडङ्गविधिरिति भावः। शान्तेरङ्गेन्द्रवज्रादिभिरावरणपूजा। विद्वानिति पीठपूजादिकमुक्तम्। यद्वा, कलशद्वयेऽपि शान्तेरेव पूजेत्यादिपक्षान्तरं सूचितम्। पुनरुभयोः निवेद्यादि सर्वं विधाय स्वं स्वं मन्त्रमभिजप्य वस्त्रेणाच्छाद्य तालत्रयादि कार्यमिति।।६३।।

पक्वं वास्तोष्पतेन्ते प्रतिमनुयुगलेनाथ सर्पिर्ध्रुवास्थू-
णाद्यैर्जातादिभिः शान्त्यृगणुभिरपि भूरादिभिश्चाखिलेषु।
भर्गे दुर्गापदे पञ्चभिरिह जुहुयाद् ब्रह्मभिर्गुह्यमन्त्रैः
शाङ्र्गीशे तत्पुरस्तात् तदुपरि निजषण्मन्त्रकैः षण्मुखे च।।६४।।

विमर्शिनी

अथाखिलेषु परिधिस्थापनाद्याज्यभागहोमान्ते वास्तोष्पतेन्ते प्रतिमनुयुगलेन

---

१. 'देवं प्र' ख. पाठः

Shripuram Publications
www.shripuram.org

वास्तोष्पत इत्यन्ते 'प्रतिजानीहि'त्यादिना 'वास्तोष्पते शग्मया' इत्यादिना च मन्त्रद्वयेन पक्वं जुहुयात्। अथ वास्तोष्पतेन्ते ध्रुवास्थूणाद्यै षड्भिः, जातादिभिः 'जातवेदस' इत्यादिपञ्चभिर्दुर्गाभिः, शान्त्यृगणुभिः शान्तिदेवत्याभिः 'शन्न इन्द्राग्नी'त्यादिभिः पञ्चदशभिः ऋग्भिः, भूरादिभिर्व्याहृतिभिश्चापि सर्पिर्जुहुयात्। इह भर्गे शिवे दुर्गापदे पञ्चदुर्गास्थाने पञ्चभिर्ब्रह्माभिश्च, शाङ्गीशे तत्पुरस्तात् पञ्चदुर्गाभ्यः पुरस्ताद् गुह्यमन्त्रैः, षण्मुखे त(दुपरि) पञ्चदुर्गाणामुपरि निजषण्मन्त्रकैश्च जुहुयात्।।६४।।

विवरणम्

पक्वमिति। आध्वर्यवार्हाग्निमुखादिक्लृप्त्येत्येतदिहापि समानम्। पुनः परिधिनिधानादि कृत्वा पक्वं जुहुयात्। वास्तोष्पतेन्ते प्रतिमनुयुगलेनेति। वास्तोष्पतेपदावसाने प्रतीत्यादिना मनुद्वयेन वास्तोष्पते प्रतिजानीहीति। द्वयमयमनुनेत्यर्थः। प्राग्वत् पूर्वां पुरोनुवाक्यामुक्त्वोत्तरया होमः। अथ सर्पिर्ध्रुवास्थूणाद्यैरिति। वास्तोष्पतेन्ते इत्यनुवर्तते। वास्तोष्पतेध्रुवास्थूणाद्यैः षड्भिः। यदुक्तं -

"वास्तोष्पते ध्रुवास्थूणा ततो गृह्यंभयादिना।
अक्षिस्पन्देत्यादिना च दुःस्वप्नेत्यादिना ततः।।
वास्तोष्पते प्रतरणोऽमीवहेत्यादिना(पि) च।"

इति। जातादिभिरिति। पञ्चदुर्गाभिः। शान्त्यृगणुभिरिति। शन्न इन्द्राग्नी इत्यादिपञ्चदशभिः। शन्नः पञ्चोना शान्तिरिति ह्युक्तम्। भर्ग इति। पञ्चदुर्गास्थाने पञ्चब्रह्मभिः। गुह्यमन्त्रैरिति। हरिहरे पञ्चदुर्गातः पूर्वं स्वैः पञ्चतत्त्वैः। तदुपरीति। स्कन्दे पञ्चदुर्गातः पश्चात् स्वैः षण्मन्त्रैः।।६४।।

शन्नोदेव्यणुना शमीधृतहविः सर्पींषि गव्याप्लुता
दूर्वाश्चाष्टशतं जुहोतु निखिले पूर्णाभिपूर्णं पृथक्।
दुर्गायां पुनराद्ययादिमचतुष्कं दानवारौ हुनेद्
दूर्वा मूलत[1] एव शास्तृगुहयोः सर्वं जिनार्णेन वा।।६५।।

विमर्शिनी

निखिले निखिलेषु देवेषु शमीधृतहविस्सर्पींषि गव्याप्लुताः दूर्वाश्चाष्टशतं

१. 'लमहाणुनायेगु' ख. पाठः

Shripuram Publications
www.shripuram.org

शन्नोदेव्यणुना पूर्णाभिपूर्णं पूर्णाहुतिभिः पूर्णं यथा भवति तथा जुहोतु। दुर्गायां पुनराद्यया 'जातवेदस' इत्यृचा आदिमचतुष्कं समिदाज्यच(रुरा?र्वा) ज्यानि हुनेत्। दानवारौ विष्णौ दूर्वास्तु मूलत एव, शास्तृगुहयोः सर्वं द्रव्यपञ्चकं जिनार्णेन गायत्र्या वा हुनेत्।।६५।।

विवरणम्

शमीति शमीसमिधां ग्रहणम्। पूर्णाभिपूर्णं पृथगिति। एकैकवर्गान्ते पूर्णाहुतिरपि स्ववक्ष्यमाणेन कार्येत्यर्थः। दुर्गायामिति। आद्यया 'जातवेदसे सुनवाम सोममि'त्यनया शमीसमिधादिचतुष्कं जुहुयात्। दानवाराविति। विष्णौ मूलत एव दूर्वाहोमः शेषितमेव तु शन्नोदेव्यणुनेति भावः। शास्तृगुहयोरिति। सर्वं शमीसमिदादिचतुष्कं दूर्वाश्च।।६५।।

प्राक् पावकं स्विष्टकृतोऽवशिष्टेनान्नेन तोयाज्यसमन्वितेन।
विकीर्य दर्भाग्रचयं नमोरुद्राद्येन मन्त्रेण बलिं दिदध्यात्।।६६।।

विमर्शिनी

पावकं प्राग् अग्नेः प्राग्भागे दर्भाग्रचयं विकीर्य स्विष्टकृतोऽवशिष्टेन स्विष्टकृदवदानोच्छिष्टेन तोयाज्यसमन्वितेनान्नेन नमोरुद्राद्येन 'नमो रुद्राय वास्तोप्पतये' इत्याद्येन मन्त्रेण बलिं विदध्यात्।।६६।।

विवरणम्

प्राक् पावकमिति। दर्भाग्रचयं विकीर्य बलिं विदध्यादित्यन्वयः। जलगन्धादिपूजा तु सामान्यसिद्धा।।६६।।

एकाशीतिपदात्मपद्मविहितं वह्नेरुदीच्यामुत[1]
प्राच्यां वास्तुबलिं महेशदिशि वा कुर्यान्निजोक्तक्रमात्।
सम्पातेन सं[2]भस्मशान्तिजं[3]लगव्येनाथ शम्यादिकै-
रुक्षेच्छान्त्यभिमन्त्रितेन भवनं त्वंविप्रमन्त्रं जपन्।।६७।।

---

१. 'प्राग्वत् स्वयं साधकः कुर्याद् वास्तुबलिं तदापि शिखिनस्तस्येश्वराशामुखे। ...म्पा', २.'च', ३. 'सलिलोपेतेन शम्यत्रकैस्त्वं विप्रस्त्वमिति ब्रुवन् भगवतः प्रासादमभ्युक्षतु।। गर्भा' ख. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

वह्नेरुदीच्यामुत प्राच्यां वा महेशदिशि वा एकाशीतिपदात्मपद्मविहितम् एकाशीतिपदस्वरूपे पद्मे निर्विष्टं वास्तुबलिं निजोक्तक्रमाद् निजनिजोक्तरीत्या कुर्यात्। अथ वास्तुबलेरनन्तरं सभस्मशान्तिजलगव्येन भस्मप्रणीतजलगव्यशेषैर्युक्तेन शान्त्यभिमन्त्रितेन 'शन्नो देवारि'ति जप्तेन सम्पासेन शम्यादिकैः शमीपलाशाश्वत्थशाखादर्भैः 'त्वंविप्र'मन्त्रं जपन् भवनमुक्षेत्।।६७।।

विवरणम्

एकाशीतिपदात्मपद्मविहितं वास्तुबलिमिति। क्षेत्रे रन्ध्रपुट इत्यादिनैकाशीतिपदात्मके पद्मे विहितमित्यर्थः। निजोक्तक्रमादिति। स्वस्वोक्तप्रकारेण। सभस्मशान्तिजलगव्येनेति। यदुक्तं–

"शाखयोदुम्बरस्य वा।
पलाशशाखया वाथ दर्भमुष्ट्याथवा पुनः"।।

इति। कुशाग्रैः प्रोक्षेदिति चाप्युक्तम्। शान्त्यभिमन्त्रितेनेति। 'शन्नो देवीरि'ति साष्टशतमभिमन्त्र्य तेन प्रोक्षणमुक्तम्। भवनमिति। प्रासादान्तर्बहिरपीति भावः।।६७।।

[1]गर्भागारे कलशसुभृतांस्तण्डुलान् गेहमूर्त्तौ
प्रोत्कीर्यैतत्कलशसलिलैश्चापि सिक्त्वा तयर्चा।
कृत्वा पुण्याहमपि सशिवं वास्तुवादादि विप्रैः
कृत्वा नीराजनमपि निजास्त्रेण रक्षां च कुर्यात्।।६८।।

विमर्शिनी

गर्भागारे गर्भगृहे गेहमूर्त्तौ प्रासादरूपमूर्त्तौ कलशसुभृतान् वास्तुकलशस्थान् तण्डुलान् मूलेन प्रोत्कीर्य एतत्कलशसलिलैः वास्तुकलशजलैश्चापि तथा 'शन्नो देवीरि'ति

---

१. 'लये निहितदर्भचये निजेन
प्रासादरूपमणुना पुरुषं प्रकल्प्य।
तस्मिन् समर्प्य घटपूरिततण्डुलानि
मूलेन शान्तिकलशेन तया च सिञ्चेत्।। वास्तुपुम्याहमादाय मूर्त्तिं प्रासादरूपिणीम्।
तत्स्थास्त्रघटवीर्येण गुप्तां सम्भावयेत् सदा।। शुद्धो' ख. पाठः

Shripuram Publications
www.shripuram.org

ऋचा सिक्त्वा विप्रैः सह 'ओं वास्तुदेवताः प्रीयन्तामि'त्यादिविशेषसहितं पुण्याहं सशिवं वास्तुवादादि शिवं वास्त्वित्यादिमङ्गलयुक्तं कृत्वा नीराजनमपि कृत्वा निजनिजास्त्रेण रक्षां च कुर्यात्।।६८।।

विवरणम्

गर्भागार इति। प्राग्वत् क्षालिततले दर्भान् विकीर्य स्वं स्वं पीठमिष्ट्वा प्रासादमूर्त्तिमावाह्य सकलीकृत्य स्नानसमये नीराज्य पूर्वपूजितवास्तुकलशयोर्मध्ये तण्डुलकलशमानाय्य तत्तण्डुलैस्तस्मिन् प्रासादमूर्त्तौ मूलेन प्रोत्किरणं विधाय व्यापकादि कृत्वा नीराज्य शान्तिकलशमानाय्य तेन 'शन्नो देवीरि'ति तमभिषिच्य तया व्यापकादि कृत्वा अर्घ्यं दद्यात्। विप्रैः पुण्याहमपि कृत्वेति। चतुर्भिरष्टभिर्वा मूर्त्तिपैः सह वास्तुपुण्याहं कृत्वेत्यर्थः। वास्तुदेवताः प्रीयन्तामिति च देवतोद्देशः। सशिवं वास्तुवादादीति। कृत्वेत्यस्याः क्रियाया विशेषणम्। पुण्याहान्ते तैः शिवं वास्त्वित्यपि वाचयेत्। आदिशब्देन 'शान्तिरस्तु' 'पुष्टिरस्त्वि'त्याद्याशिषां ग्रहणम्। तासां पूर्वं वा वाचनम्। यदुक्तम्–

"आशिषो वाचयित्वाग्रे शिवं वास्त्विति वाचयेत्।"

इति। नीराजनमपीति। कृत्वेत्यनुषङ्गः। पुनः प्रासादमूर्त्तेः पूजाशेषं विधाय बहिर्निष्क्रम्य निजास्त्रेण तालत्रयादिना रक्षां च कुर्यादिति।।६८।।

***शुद्धोदग्भवने च[१] सप्तदशकद्रव्यक्रमात् क्षेत्रकं**
कृत्वान्तर्नवकं प्रकल्प्य कलशानां बाह्यतो युक्तितः।
श्रीशेऽन्तर्नवकेऽङ्कुरादिनवकं गन्धोदकं दिग्विदिक्-
खण्डान्तःस्थघटेषु शुद्धसलिलं शेषेषु चापूरयेत्।।६९।।

विमर्शिनी

अथाधिवासदिवसात् पूर्वेद्युः कर्तव्यं बिम्बशुद्धिकलशपूजनमाह - शुद्धोदग्भवन इति। अथ शुद्धोदग्भवने प्रासादस्योदग्भागक्लृप्ते मार्जनादिस्थलशुद्धिभिः शुद्धे भवने सप्तदशकद्रव्यक्रमात् कलशपटले सप्तदशद्रव्ये वक्ष्यमाणक्रमात् क्षेत्रं कृत्वान्तः कलशानां नवकं बाह्येतो युक्तितश्च प्रकल्प्य श्रीशेऽन्तर्नवकेऽङ्कुरादिनवकमापूरयेत्। दिग्विदिक्ख-ण्डान्तः स्थघटेषु दिग्विदिक्खण्डानामन्तः स्थितेषु घटेषु गन्धोदकं, शेषेषु घटेषु शुद्धसलिलं

१. 'शिवादिकपुटक्षेत्रेऽङ्कवर्गादिकाः स्युः कुम्भा इह मध्यतो नवकमेतद् वा' ख. पाठः
* 'शुद्धोदग्भवनेऽथ सप्त' इति विवरणपाठः

www.shripuram.org

चापूरयेत्।।६९।।

विवरणम्

अथ तद्रात्रावेव बिम्बशुद्धिकलशपूजेति तां प्रस्तौति - शुद्धोदग्भवनेऽथेति। प्रासादस्यैश्यां दिशि स्नपनमण्डपः। तदुक्तम् -

"स्नानमण्डपमैशान्यां भूषयित्वा विशोधयेत्।"

इति। यद्वा अधिवासमण्डपापेक्षया ऐश्यां दिशि स्यात्। यच्चोक्तम्-

"प्रागुदीच्यां तु वोदीच्यामधिवासनमण्डपात्।"

इत्यादि। तदसम्भवे ततोऽपि पश्चादित्युदग्भवन इत्युक्तम्। यद्वा ओदग्भवन इति पदम् ईषदुदग्मवन इति। शुद्धपदेन तत्र मुष्ट्यादिस्थलशुद्धिरुक्ता। सप्तदशकद्रव्य-क्रमादिति। क्रमशब्देन 'शरशैलनन्दवर्गा नवोत्तरशतद्विशते चे'त्यादि वक्ष्यमाणक्रमग्रहणम्। अन्तर्नवकमिति। वक्ष्यति च–

"मध्ये पङ्कजकर्णिकादलगताः कुम्भा नव स्युः सदा।"

इति। बाह्यतो युक्तित इति। सङ्ख्येति शेषः। युक्तिशब्देन तदीयपुटोपपत्तिरभिप्रेयते। यथा सप्तपुटे त्र्येकेति नवपुटेङ्गाब्धीत्यादि। इह विष्णौ हरिहरे च सप्तदशद्रव्यं शिवादिषु नवद्रव्यम्। सर्वेष्वप्येष एव क्षेत्रविरचनविधिरिति भावः। दिग्विदिक्खण्डान्तःस्थघटेष्विति। दैविकावरणे दिक्कोणखण्डानां ब्रह्मकलशेषु। शेषेष्विति। तदीयपरि-कलशेषु।।६९।।

***मध्यान्तर्नवखण्डकेषु शिवशास्त्रोर्दिग्विदिक्क्लृप्तितो**
दुर्गेभाननयोः प्रदक्षिणतया द्रव्याणि विन्यस्यतु।
दिक्कोणक्रमतोऽन्तरादिः शरजोऽथेशाच्युते मध्यतो
मध्याशाविदिशाक्रमान्नव बहिः खण्डेषु हेमाम्बु च।।७०।।

विमर्शिनी

शिवशास्त्रोर्नवखण्डकेषु दिग्विदिक्क्लृप्तितो मध्यान्तर्द्रव्याणि विन्यस्यतु। दुर्गेभाननयोः प्रदक्षिणतया मध्यान्तश्च। शरजेऽन्तरादि दिक्कोणक्रमतश्च अथेशाच्युते

* 'मध्यान्तम्' इति विवरणपाठः

Shripuram Publications
www.shripuram.org

मध्यतो मध्यखण्डे मध्याशाविदिशाक्रमाद् मध्ये दिग्विदिक्क्रमाच्च नव द्रव्याणि बहिः खण्डेषु बहिः खण्डानामन्तः स्थघटेषु हेमाम्बु च विन्यस्यतु।।

विवरणम्

मध्यान्तमिति। द्रव्याणि विन्यस्यत्विति सर्वत्र सम्बध्यते। प्रदक्षिणतयेति। प्रागादिखण्डेषु प्रादक्षिण्येन मध्यान्तमित्यर्थः। अन्तरादि दिक्कोणक्रमत इति दैविके दिक्विदिक्खण्डे क्रम उक्तः। मध्यतो मध्याशाविदिशाक्रमान्नवेति। द्रव्याणि विन्यस्यतु। ब्रह्मकलशे तदीयेषु दिग्विदिग्गतपरिकलशेषु चेत्यर्थः। बहिःखण्डेषु हेमाम्बु चेति। दिग्विदिक्क्रमादिति भावः।।७०।।

क्षीरिश्रीबकुळाम्रचम्पकपलाशाशोकनीपार्जुन-
प्रोत्थान्यत्र तु पल्लवानि कलशे कार्शानवाशादले।
रक्षोदिक्स्थदले सपद्मकपटीरद्वन्द्वजात्यार्तवं
दर्भस्तम्बसकुन्दनन्द्यभिधदूर्वारोचनासर्षपम्।।७१।।

यवव्रीहिस्वर्णं रजततिलकूलद्वितयमृ-
च्छकृद्युक्तं न्यस्येत् सततगतिदिक्पत्रकलशे।
सहाविष्णुक्रान्तीमधुकरगुळूच्यार्द्रकशमी;
शतावर्या श्यामाकमपि शिवदिक्पत्रकलशे।।७२।।

प्रत्यक् फलं न्यसतु गव्यमवाक् कषायं
प्रागुत्तरे च शतमूल्यमृताकुमारीः।
व्याघ्रीं वचां बहुसुतां च सहां च सिंहीं
वल्मीकसप्तकमृदः कलशेऽथ मध्ये।।७३।।

ओं सोमाय वनस्पत्यन्तर्गतये नमो मृदन्तमनुः।
गन्धोदेऽष्टार्णं स्याच्छुद्धोदे द्वादशाक्षरं च हरौ।।७४।।

विमर्शिनी

हरावित्यूर्ध्वतो ग्राह्यम्। अत्र हरौ तु कार्शानवाशादले मध्यस्थपद्मस्याग्नेयकोण-

Shripuram Publications
www.shripuram.org

दलस्थे कलशे क्षीरिश्रीबकुलाम्रचम्पकपलाशाशोकनीपार्जुनप्रोत्थानि क्षीरिवृक्षाद्यर्जुन-वृक्षान्तेभ्यो गृहीतानि पल्लवानि न्यसेत्। क्षीरिणः क्षीरवृक्षास्तोरणे वक्ष्यमाणाः। (ശ്രീഃ = കൂവളം, ബകുളം = ഇലഞ്ഞി, ആമ്രം = മാവ്) चम्पकः स्वयमेव। (പലാശം = പ്ലാശ്) अशोकः स्वयमेव। (നീപം = കടമ്പ്, അർജ്ജുനം = മരുത്) रक्षोदिक्स्थदले निरृतिकोणस्थदलकलशे सपद्मकपटीरद्वन्द्वजात्यार्तवम्। सपद्मकं पद्मकसहितम्। (പദ്മകം = പതിമുകം) पटीरद्वन्द्वं चन्दनं रक्तचन्दनं च। (ജാത്യാർത്തവം = പിച്ചകപ്പൂവ്) दर्भस्तम्बसकुन्दनद्यभिधदूर्वारोचनासर्षपम्। (ദർഭസ്തംബം = ദർഭമുള, കുന്ദം = കുരുന്ന്, കുരുക്കുത്തി, നദീ = നന്ത്യാർവട്ടം, രോചന = ഗോരോചന) सततगतिदिक्पत्रकलशे वायव्यकोणगतकलशे यवव्रीहिस्वार्णं यवाः व्रीहयः स्वर्णं च रजततिलकूलद्वितयमृच्छकृद्युक्तं, कूलद्वयमृद् नदीतीरद्वयस्था मृत्, शकृद् गोमयं, तैर्युक्तं न्यस्येत्। शिवदिक्पत्रकलशे ईशानकोणदलकलशे सहाविष्णुक्रान्तीमधुकरगुलूच्यार्द्रकशमीः (സഹാ = പൂവാംകുരുന്തൽ, മധുകരം= കയ്യൂന്നി, ഗുളൂചി = ചിറ്റമൃത്, ആർദ്രകം = ഇഞ്ചി, ശമീ = വന്നി) शतावर्या सह। (ശതാവരീ = ശതാവേലി, ശ്യാമാകം = കവിട്ട) प्रत्यक् पश्चिमे फलं फलोदकं न्यसतु। अवाक् दक्षिणे गव्यं, प्राक् प्राग्भागे कषायम्। उत्तरे शतमूल्यमृताकुमारीः। (ശതമൂലീ = കൂങ്ങിരിക്ക) अमृता स्वयम् (കുമാരീ = കറ്റുവാഴ, വ്യാഘ്രീ = ചെറുവഴുതിന, വചാ = വയമ്പ്) बहुसुता शतावरी। सहा उक्ता (സിംഹീ = വലിയ വഴുതിന) एताः न्यसतु। अथ मध्ये मध्यस्थे कलशे वल्मीकसप्तकमृदः वल्मीकानां सप्तकादाहृता मृदाः। 'ओं सोमाय वनस्पत्यन्तर्गतये नमः' इति मृदन्तमनुः पल्लवादिमृदन्तेषु पूरणे मन्त्रः स्यात्। गन्धोदे गन्धोदकेषु अष्टार्णं, शुद्धोदे द्वादशाक्षरं च।।७१, ७२, ७३, ७४।।

विवरणम्

विष्णावङ्कुरादिनवकं तावदाचष्टे - क्षीरिश्रीति। श्रीवृक्षो बिल्वः।

पल्लवमङ्कुर एव। कार्शानवाशदले। कृशानुरग्निः। तदीयं कार्शानवम्। आशादले[1] दिग्दल इति यावत्। पटीरद्वयं चन्दनद्वयम्।।७१।।

कूलद्वितयेति नदीतटद्वयग्रहणम्। सततगतिर्वायुः।।७२।।

---

१. 'आग्नेयदि' क. पाठः

Shripuram Publications
www.shripuram.org

गव्यमवागिति। दक्षिणतः पञ्चगव्यम्। कषायं प्रागिति पृथग्वाक्यम्। वल्मीकसप्तकमृदः कलशेऽथ मध्ये इति। ब्रह्मकलशे सप्तभ्यो वल्मीकेभ्य आहृता मृद इत्यर्थः। द्रव्यन्यासोऽयमग्न्यादिकोणेषूक्तः प्रदक्षिणः ततोऽप्रदक्षिणः पश्चिमादिदिक्ष्वन्तरन्तत इति।।७३।।

मृदन्तमनुरिति। पल्लवादिमृदन्तद्रव्याणां न्यासे मन्त्रः।।७४।।

क्वाथोदगव्यभसितानि शिवे मृदम्भो-
गोमूत्रदुग्धदधिकं कुशगन्धवारि।
मृत्साजलं क्वथितवार्यथ पञ्चगव्यं
व्यस्तं समस्तमपि गन्धजलं प्रभेशे।।७५।।

विमर्शिनी

शिवे क्वाथोदगव्यभसितानि कषायं पञ्चगव्यं भस्मोदकं च, मृदम्भोगोमूत्रदुग्धदधिकं गोमूत्रं क्षीरं दधि च, कुशगन्धवारि कुशोदकं गन्धोदकं च। क्रमः प्रागुक्तः न्यसत्विति पूर्वस्मादायाति। प्रभेशे मृत्साजलं क्वथितवारि, अथ व्यस्तं पृथक्स्थितं पञ्चगव्यं पञ्चसु घटेषु, पुनः समस्तं पञ्चगव्यमप्येकस्मिद् घटे, गन्धजलं च।।७५।।

व्यस्तं क्रमेण महिषद्विषि पञ्चगव्यचं
मृत्क्वाथरत्नसलिलान्यपि गन्धतोयम्।
पाद्यार्घ्यगव्यकपयांसि दधि द्विपास्ये
क्वाथाम्बुमृत्कुशजलान्यपि गन्धवारि।।७६।।

विमर्शिनी

महिषद्विषि व्यस्तं पञ्चगव्यं क्रमेण गोमूत्रगोक्षीरदध्याज्यक्रमेण, मृत्क्वाथरत्नसलिलानि मृज्जलं कषायं रत्नजलं च, गन्धतोयमपि। द्विपास्ये पाद्यार्घ्यगव्यकपयांसि पाद्यमर्घ्यं गव्यं च क्षीरं च दधि, क्वाथम्बुमृत्कुशजलानि कषायं मृज्जलं कुशजलं च, गन्धवार्यपि।।७६।।

कौशोदगव्यककषायकदौर्व्यराजी-
मृद्रत्नशुद्धजलगन्धजलं कुमारे।

Shripuram Publications
www.shripuram.org

मृत्क्वाथकं हरिहरे पृथगास्थितानि
गव्यानि पञ्च फलवार्यखिलौषधं च।।७७।।

विमर्शिनी

कुमारे कौशोदगव्यककषायकदौर्व्यराजीमृद्रत्नशुद्धजलगन्धजलं कौशोदं गव्यं कषायं दूर्वोदं सर्षपोदं मृज्जलं रत्नजलं शुद्धजलं गन्धजलं च। हरिहरे मृत्क्वाथकं पृथगास्थितानि पञ्चगव्यानि फलवारि अखिलौषधं च न्यसतु।।७७।।

स्वस्वदिक्संस्थितब्रह्मतदङ्गैरिह पूरयेत्।
मदनद्रुहि तद्द्रव्याण्यपरेषु स्वमूलतः।।७८।।

विमर्शिनी

मदनद्रुहि शिवे इह बिम्बशुद्धिकलशपूरणे स्वस्वदिक्संस्थितब्रह्मतदङ्गैः दिक्षु तत्पुरुषादिभिः अग्न्यादिकोणेषु हृदयशिखाकवचशिरोभिः पञ्चब्रह्माङ्गैर्मध्यकलश ईशानेन च (तद्)द्रव्याणि पूरयेद्, अपरेषु देवेषु स्वस्वमूलतश्च।।७८।।

विवरणम्

स्वस्वदिकसंस्थितेति।

पुङ्घोरसद्यवामाः स्युर्दिक्षु कोणेषु हृच्छिखे।
वर्मशीर्षे च मध्ये स्यादीशानः पूरणे मनुः।।

इति। शिवेऽपि सप्तदशद्रव्यं वा स्यात्। तथोक्तम्-

'हेमरत्नाष्टगन्धादिभिः पूरयेन्मध्यमं पटम्।
कषायं पञ्चगव्यं च भस्मोदं मार्त्तिकं जलम्।।
दिक्षु कोणेषु गोमूत्रं क्षीरं दधि कुशोदकम्।
अन्तः पद्मदलेष्वष्टौ जलधीन् पूरयेत् क्रमात्।।
व्यस्तैर्मन्धैश्च सम्पूज्य शुद्धोदैरपरान् घटान्।"

इति। समुद्रजलानामष्टगन्धानां चायं विकल्प इति बोद्धव्यम्। वरुणश्च तेषां देवतेति पूरणामन्त्रोऽपि लभ्यत इति।।७८।।

Shripuram Publications
www.shripuram.org

स्थाणौ नाकूक्षतीर्थद्विपशिखरिनदीवेदिकाचत्वरोत्था
विघ्ने क्षेत्राखुजाढ्यश्च्युतचरमसरिज्जाश्च्युताद्यन्तिमाः स्युः।
सक्रोडोत्थाः कुमार्यां सरिदुभयतटक्षेत्रनाकूक्षजाता
मृत्साः शाङ्र्गीश आर्ये करिकिरिवृषवल्मीकनद्युद्भवाश्च[1] ।।७९।।

विमर्शिनी

मृदादीनि कथयति - स्थाणाविति। स्थाणौ नाकूक्षतीर्थाद्विपशिखरिनदीवेदिका-चत्वारोत्थाः वल्मीकवृषशृङ्गस्थतीर्थस्थगजशृङ्गस्थपर्वतस्थनदीगतवेदिकास्थचत्वरस्था मृदः स्युः। विघ्ने क्षेत्राखुजाढ्याः क्षेत्रजाखुजाभ्यां युक्ताः च्युतचरमसरिज्जाः हीनचत्वरस्थ-नदीगताश्च। कुमार्यां च्युताद्यन्तिमाः रहितवल्मीकचत्वारस्थाः सक्रोडोत्थाः सूकरदारितमृत्सहिताश्च। शाङ्र्गीशे सरिदुभयतटक्षेत्रनाकूक्षजाताः नद्या उभयतटाद् क्षेत्राद् वल्मीकादुक्षशृङ्गाच्च जाता मृत्साः मृदः। आर्ये करिकिरिवृषवल्मीकनद्युद्भवाः गजवराहवृषदन्तेभ्यो वल्मीकनदीभ्यां चोद्भवाश्च।।७९।।

विवरणम्

नार्कुवल्मीकम्। द्विपादिपदैस्तच्छृङ्गग्रहणम्। विघ्ने क्षेत्राखुजाढ्याश्च्युतचरमसरिज्जा इति। शिवोक्ता एव गणपतौ मृदः। किन्तु क्षेत्रमूषिकमृदौ योज्ये, चरमा चत्वरजा नदीजा च हेये इत्यर्थः। च्युताद्यन्तिमाः स्युः सक्रोडोत्थाः कुमार्यामिति। वल्मीकचत्वारमृदौ हेये। वराहमृद्योज्येत्यर्थः। करी गजः किरिर्वराहः।।७९।।

क्षीरि[2]द्विजद्रुमशमीखदिरं कुमार्यां
क्वाथाङ्गकं हरिहरे खदिरोनितं तत्।
विघ्ने पयोद्रुमकपित्थमधूकबिल्वं
शेषं[3]प्रसिद्धिं[4]रुपरि स्नपनाभिधाने।।८०।।

विमर्शिनी

कुमार्यां क्षीरिद्विजद्रुमशमीखदिरं क्वाथाङ्गकं कषायाङ्गम्। हरिहरे खदिरोनितं खदिररहितं तदेवं। विघ्ने पयोद्रुमकपित्थमधूकबिल्वम्। (കപിത്ഥം = വ്ളാത്തി,

---

१. 'वाः स्युः।।' ख. पाठः, २. 'र', ३. 'षे', ४. 'द्धमुप' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

മധൂകം = ഇരിപ്പ) शेषप्रसिद्धिः शेषद्रव्याणां प्रकर्षेण सिद्धिः प्राप्तिः उपरि स्नपनाभिधाने कलशपटले ।।८० ।।

विवरणम्

द्विजः पलाशः। शेषप्रसिद्धिरिति। विष्णौ फलकषायगन्धानां, शिवे कषायभस्मगन्धानां, शास्तरि कषायगन्धयोर्दुर्गायां रत्नगन्धयोः, विघ्ने पाद्यार्घ्यगन्धानां, स्कन्दे कषायमृद्रत्नगन्धानां, हरिहरे फलस्य च प्रसिद्धिरित्यर्थः।।८० ।।

सर्वौषधानि[१] तिलमाषयवप्रियङ्गु-
गोधूमशाल्यणुसमाह्वयकान्यथ[२] स्युः।
नीवारगार्मुकगवीथुकजर्तिलाख्य-
श्यामाकवेणुफलवास्तुकसंयुतानि।।८१ ।।

विमर्शिनी

अथ हरिहरे तिलमाषयवप्रियङ्गुगोधूमशाल्यणुसमाह्वयकानि (അണു = മത്തം പുല്ല്) इति ग्राम्याणि सप्त। नीवारगार्मुकगवीथुकजर्तिलाख्यश्यामाकवेणुफलवास्तुकसंयुतानि। (നീവാരം = വരിനെല്ല്, ഗാർമ്മുകം = കാട്ടുപയറ്, ഗവീധുകം = ചിലന്നി, ജർത്തിലം = കാട്ടെള്ള്, ശ്യാമാകം = കവിട്ട, വേണുഫലം = മുളനെല്ല്, വാസ്തുകം = വാസ്തുചീര) इत्यारण्यकैः सप्तभिः सहितानि सर्वौषधानि स्युः। तथाचाहुः–

"तिलमाषव्रीहियवाः प्रियङ्गवश्चाणवश्च गोधूमाः।
एता ग्रामौषध्यो नीवाराद्यास्तथैव चारण्याः।।
नीवारश्यामका गवीथुका जर्तिलाश्च वेणुफलाः।
गार्मुकवास्तुसमेता आरण्याः सप्त च स्युरौषध्यः।।"

इति।।८१ ।।

विवरणम्

सर्वौषधानीति। तिलानीति सप्त ग्राम्याणि, नीवारादीनि सप्तारण्यानीति विभागः। यद्वा–

---

१. 'नि यवमाषतिलप्रि', २. 'नि सप्त'। ख. पाठः

Shripuram Publications
www.shripuram.org

"तिलमाषयवव्रीहिगोधूमाणुप्रियङ्गवः।
तथा श्यामाकनीवारजर्तिलाश्च गवेधुकाः।।
गार्मुकाणुयवा वास्तुनिष्पावाश्च कुलस्थकाः।
स्मृता सप्तदशौषध्य आढकीभिस्समन्विताः।।"

इति।।८१।।

मूलाष्टोर्ध्वशताज्यहुत्युदितसंपातं समर्प्यात्मभू-
खण्डस्थेषु हिरण्यवर्णमनुमन्येषु स्वमूलं हरौ।
सर्वत्र स्वकमूलमेव परिजप्यान्येषु वस्त्रैर्नवै-
शच्छाद्येत्यधिवास्य तत्स्नपनतः पूर्वेऽह्नि रक्षेद् घटान्।।८२।।

विमर्शिनी

क्रियाशेषमाह - मूलेति। एवं कलशान् सम्पूर्य सम्पूज्य मूलाष्टोर्ध्वशताज्यहुत्युदितसम्पातं मूलेनाष्टोर्ध्वं शतमाज्यं हुत्वा तत्सम्पातं कलशेषु समर्प्य हरौ आत्मभूखण्डस्थेषु मध्यखण्डस्थकलशेषु हिरण्यवर्णमनुं 'हिरण्यवर्णां हरिणीमि'ति मन्त्रम्, अन्येषु खण्डगतकलशेषु स्वमूलम् अन्यत्र देवेषु सर्वत्र अन्तर्बहिश्च स्वकमूलं स्वस्वमूलमेव परिजप्य नवैर्वस्त्रैराच्छाद्य इति उक्तप्रकारेणाधिवास्य तत्स्नपनतः पूर्वेऽह्नि घटानाधिवास्य रक्षेत्।।८२।।

विवरणम्

मूलाष्टोर्ध्वशतेति। कलशक्षेत्रोदम्भागेऽग्निमाधायग्निमुखं विधाय तत्तन्मूलेनाष्टोत्तरशतवारम् आज्यं हुत्वा पूर्णापि हुत्वा होमशेषं समाप्य तदुत्थं सम्पातं द्रव्यकलशेषु सिक्त्वा मूलं जपेत्। आत्मभूर्ब्रह्मा। विष्णौ ब्राह्मखण्डगतनवकलशेषु हिरण्यवर्णामिति प्रागाद्यन्यखण्डेषु स्वमूलमपि जपेत्। अन्येषु सर्वत्र स्वकमूलमेव परिजप्येत्यन्वयः। सर्वत्रेति। वाह्यखण्डेषु ब्राह्मखण्डे चेत्यर्थः। इत्याधिवास्येति। उक्तप्रकारेणेत्यर्थः। स्नपनतः पूर्वेऽह्नीति। बिम्बाधिवासदिनपूर्वदिने। रात्राविति भावः। रक्षेदिति तालत्रयादिभिरिति शेषः।।८२।।

Shripuram Publications
www.shripuram.org

इति तन्त्रसमुच्चये तृतीयः पटलो मङ्गलबीजरोपणाढ्यः।
जलवासनवास्तुयागबिम्बाप्लवकुम्भार्चनचर्चितः प्रणीतः।।८३।।

विमर्शिनी

पटलमुपसंहरति - इतीति। तन्त्रसमुच्चये ग्रन्थे तृतीयः पटलः प्रणीतः कृतः। कथंभूतः मङ्गलबीजरोपणाढ्यः मङ्गलबीजरोपणाभिधानेन परिपूर्णः जलवासनवास्तुयाग-बिम्बाप्लवकुम्भार्चनचर्चितः जलाधिवासनस्य प्रासादशुद्ध्यादिवास्तुपूजायाः बिम्बशुद्धिकल-शार्चनस्य चोक्तिभिः पूजितः।।८३।।

इति तन्त्रसमुच्चयविमर्शिन्यां

तृतीयः पटलः।।